Chapter-1

# भारतचम्पूकाव्यस्य
# साहित्य दृष्ट्या समीक्षणे
## प्रथम-खण्डम्

श्रीदुर्गाम्बायै नमः

# भारतचम्पूकाव्यस्य साहित्यदृष्ट्या समीक्षणम्

## मंगलाचरणम्

केलौ विघ्नविघाते कल्याशनमपि मुहुर्न गणयन्तम् ।
बालं स्वमनुनयन्ती मुदा जयन्ती शिवा स्वकान् पायात् ।। १ ।।

## कवेर्महिमा

विश्वेश्वरस्य विश्वस्मिन्नपि वसुंधरा वलये समुपलभ्यमानानां वस्तूनां मध्ये काव्यस्यास्ति अतीवोच्चं स्थानम् । कानिचिद् वस्तूनि अत्र रुचिरतमानि कानिचित् च उपयोगितमानि सन्ति, तर्हि काव्याभिधं वस्तु परानन्दसंपादकत्वेन रुचिरतमं धर्मादिचतुर्वर्गसाधकत्वेन उपयोगितमं चाप्यस्ति । काव्यस्य परानन्दसंपादकत्वं धर्मादिचतुर्वर्गसाधकत्वं चोक्तमाग्नेयपुराणे यथा-

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।। इति ।

काव्यप्रकाशे च यथा-

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।। इति ।

एवं काव्यस्य परानन्दजनकत्वेन रुचिरतमत्वं धर्मादिचतुर्वर्गसाधकत्वेन उपयोगितमत्वं च स्पष्टम् । काव्यं च कविकर्म, यदि कविकर्मण एतावान् महिमा, तर्हि तन्निर्मातुरपि महिमा न कथमपि ततो न्यूनो भवितुं शक्नोति, अपितु तन्निर्मातृत्वेन सह परानन्दस्य परोपकारस्य च जनकत्वेन कवेः कोपि महिमातिशयो मन्तव्यः । एवं सत्यपि कवेर्महिमातिशये यदुच्यते स्वयं कविना स्वविषये क्वाचित् —

मन्दः कवियशः-प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ।।

तत् स्वस्य स्वकृतिद्वारा परानन्दसंपादकत्वेपि परोपकारस्यच साधकत्वेपि स्वकीयगर्व-परिहारार्थमेवोक्तं मन्तव्यम् । एवं कविकुंजरस्य श्रीमतोऽनन्तभट्टस्यापि कीर्त्यादिस्वार्थसंपादकत्वेन सह परकीयस्य परानन्दस्य लोकव्यवहारज्ञानस्य च संपादकत्वेन लोकोपकारित्वादस्ति कोपि महान् महिमा ।

## महाकविरनन्तभट्टः

### समयः

भारतचम्पूकारः श्रीमाननन्तभट्टः कस्मिन् समये कस्मिन् च स्थाने जनिं लेभे, इतिविषये इतिहासविदां मौनमेव दृग्गोचरीभवति, यतोहि अनन्तेनस्वयं स्वदेशकालविषये न किमपि सूचितमस्ति, नच निश्चितदेशकालेन विदुषा केनापि अन्येन लिखितमस्ति किमप्यनन्तभट्टविषये, केवलं किंवदन्त्यनुसारं पुरातत्वविद्भिर्विद्वद्भिः भारतचम्पूकृदनन्तभट्टः भागवतचम्पूकारस्याभिनवकालिदासस्य प्रतिस्पर्धी तत्वेन च तत्समकालिको मन्यते (1), यतो हि यथा अभिनवकालिदासेन भागवतचम्पूः भारतचम्पूश्चेति ग्रन्थद्वयं निरमीयत, तथा अनन्तभट्टेनापि भारतचम्पूः भागवतचम्पूश्चेति ग्रन्थद्वयं प्राणीयत। अभिनवकालिदासस्य भारतचम्पूर्नोपलभ्यते, उपलभ्यते केवला भागवतचम्पूः, यत्र मंगलाचरणरूपे प्रथमे पद्ये कल्याणमिति पदं प्रयुज्यते सर्वतः पूर्वम् । एवमेव अनन्तभट्टेनापि स्वकीयायाः भारतचम्प्वाः मंगलाचरणरूपे प्रथमे पद्ये प्रथमं पदं कल्याणमित्येव प्रयुज्यते । एवमभिनवकालिदासस्यानन्तभट्टस्य च काव्ययोः चम्पूरूपत्वेन तद्विषययोश्च च भागवतमहाभारतान्यतरकथामूलत्वेन तन्मंगलाचरणरूपप्रथमपद्यप्रारंभिकपदस्य चैकत्वेन साम्यात् तयोः प्रतिस्पर्धित्वं स्पष्टम् । अभिनवकालिदासस्य दक्षिणापथप्रथितविद्यानगरनरपते राजशेखरस्य राजकविरासीदिति राजशेखरचरितादवगम्यते। राजशेखरश्चराजेन्द्रचोल - विजयवर्मपाण्ड्ययोः समकालि-

---

1 एतद्विषये वाराणसेय- चौखम्भा विद्याभवन प्रकाशितस्य भारतचम्पूपुस्तकस्य श्रीरामचन्द्रमिश्र लिखितायाः प्रस्तावनायाः चतुर्थं पृष्ठं द्रष्टव्यम् ।

क एकादशशताब्दीभवोमन्यते पुरातत्वविद्भिः । अतो राजशेखरस्य राजकविरभिनवकालिदासोपि एकादशशताब्दीभवः स्वीकृत ऐतिहासिकैः ( 1 ) । यदि अभिनवकालिदास एकादशशताब्द्यामासीत्, तर्हि तत्प्रतिस्पर्धिनोऽनन्तभट्टस्यापि एकादशशताब्दीभवत्वं मन्तव्यं भवति।

भारतचम्पूकाव्यस्य दक्षिणभारतीयपुस्तकालयस्थितेषु केतिचित् हस्तलिखितपुस्तकेषु कल्याणं वो विधतामित्यादिमङ्गलाचरण प्राक् अन्यदेकं निम्नाकितं पद्यं लिखितं प्राप्यते ( 2 ) यथा-

शरदिन्दु विकासमन्दहासां स्फुरदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्यमरविन्दासनसुन्दरीमुपासे ।। इति ।

किन्त्वेतस्य अनन्तकविकृतत्वं नास्माभिर्मन्तुं शक्यम् । यतो हि अनन्तभट्टः अतीवप्रौढः प्रगल्भश्च कविरासीत् । भाषायां छन्दःसु च तस्य प्रगाढोऽधिकारो दृग्गोचरो भवति । तस्य कस्मिन्नपि पद्ये एकस्यापि पदपूरणमात्रप्रयोजनकस्य पदस्य स्थितिर्नोपलभ्यते । यदाहि शरदिन्दुविकासेत्यादिपद्ये एकस्मिन्नेव विकास-समान-स्फुरदितिशब्दत्रयस्यानावश्यकस्य स्थितिरुपलभ्यते, विकासहासयोरुपमानोपमेयभावस्य धीरगम्भीराया महादेव्या लोचनयोः स्फुरणशीलत्वस्य चाभावात् प्रसिद्धसादृश्ययोरुपमानोपमेययोरन्तर्निहितस्य समानशब्दस्य गद्यमानत्वाच्च उक्तशब्दत्रयोपादानस्यानौचित्यं स्पष्टम् । शरदिन्दुविकासेत्यादिपद्यस्य ग्रन्थारम्भत्याज्यसगणघटितस्य महाकविना स्वग्रन्थारम्भ एव विन्यस्तत्वानुपपद्यमानत्वस्योपि उक्त पद्यस्यानन्तकविकृतत्वस्वीकारे बाधकत्वात् । अस्माभिस्तु संभाव्यते यत् -

आशासु राशीभवदङ्गवल्लीभासैव दासीकृतदुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दितशारदेन्दुं वन्देऽरविन्दासनसुन्दरि त्वाम् ।।

इतिमल्लिनाथीयपद्यसौन्दर्यसमाकृष्टहृदयेन भारतचम्पूपुस्तकलेखनकर्त्रा केनचिद् विदुषा गृहीततत्पद्यकतिचिच्छब्दार्थेन निर्माय शरदिन्दुविकासेत्यादिपद्यं चापल्येन कल्याणमित्यादिमङ्गलाचरणपद्यात् प्राग् लिखितमस्ति । अतोनन्तभट्टेनापि अभिनवकालिदासेनेव स्वरचितग्रन्थे प्रथमं मङ्गलाचरणपद्यं कल्याणमितिप्रथमविन्यस्तपदघटितमेव व्यरच्यतेति अनन्तभट्टस्याभिनवकालिदासप्रतिस्पर्धित्व संभावनाबीजं न शिथिलमिति मन्तव्यम् । -( 1- 2)टिप्पणी पर पृष्ठे द्रष्टव्या ।

यद्यपि पुरातत्वविदां विदुषां पुरातनानां सम्मतो नन्तभट्टस्याऽभिनवकालिदासप्रतिस्पर्धित्वरूप: तत्समकालिकत्वहेतु: नास्त्यव्यभिचरित: भिन्न कालिकानामपि माघाश्वघोषादीनां भारविकालिदासादिप्रतिस्पर्धित्वस्योपलम्भात् । तथापि अनन्तभट्टस्य अभिनवकालिदासप्रतिस्पर्धित्वस्यैवतत्प्रतियोगिकवैरभाजनत्वस्यापि संभाव्यमानत्वात् तत्समकालिकत्वस्यसिद्धि: संभवति । अनन्तभट्टेन चम्पूभारतान्ते समुल्लिख्यमाने स्वग्रन्थप्रशस्तिपद्ये-

उन्मीलदम्बुजकदम्बकसौरभीणामुन्नृत्यदीशमुकुटीतटिनीसखीनाम् ।
आचान्तवैरियशसाममृतोर्मिलानां वाचामनन्तसुकवेर्वसुधैवमूल्यम्   ।।

इत्यस्मिन् परामूर्तिं गता: स्ववैरिण: स्मर्यन्ते । तत्र स्वप्रतिस्पर्धाविषयात् अभिनवकालिदासादृते नान्य: कश्चिदुपलभ्यते , यो नन्तभट्टस्य वैरित्वेन प्रसिद्धिं प्राप्त: स्यात् । परिशेषादभिनवकालिदास स्वानन्तभट्टस्य वैरित्वेन संभाव्यते । तत्संभावनाबीजं च किंवदन्त्यनुसारं तत्प्रतिस्पर्धित्वमनन्तभट्टस्य प्रकटमेव । यदि अनन्तभट्ट: अभिनवकालिदासस्यप्रतिस्पर्धी आसीत्तर्हि अभिनवकालिदासस्यापि स्वरचितयोर्ग्रन्थयोरेव विषयमादाय अभिनवमनोहरतरग्रन्थनिर्माणेन स्वयशोपहरणप्रवृत्तेऽनन्तकवौ वैरमपि संगच्छतेतराम् । एवं हि यदि अनन्तकविरभिनवकालिदासस्य न केवल: प्रतिस्पर्धी, अपि तु तद्-वैरभाजनमप्यभवत्, तर्हि वैरिणो: कयोश्चिदपि भिन्नकालिकत्वस्यासंभवत्वात् अनन्तभट्टोऽभिनवकालिदाससमकालिक: सिद्धत्येव ।

---

पूर्वपृष्ठ टिप्पणि:-

१ एतद् विषये कृष्णमाचारियरस्य हिस्टरी आफ क्लासिकल संस्कृतलिटरेचरस्य ५०६ पृष्ठे तथा चन्द्रशेखरस्य संस्कृतलिटरेचरस्य १३८ पृष्ठे द्रष्टव्यम् ।

२ एतद् विषये कृष्णमाचारियरस्योक्तहिस्ट्रीग्रन्थस्य ५११ पृष्ठे द्रष्टव्यम् ।।

देश:

भारतचम्प्वाँ तृतीयस्तबके चतसृणामपि दिशां वर्णनमुपलभ्यते, तत्र दक्षिणस्या दिशोवर्णने कविना ३३ त: ३५ पद्येषु जलधे: कावेर्या: चोल पाण्ड्यदेशयोश्च वर्णनं कुर्वता कविना स्वकीयम् अतीवमार्मिकत्वं सहृदयत्वं च प्रकटीकृतमस्ति , तेनतस्य दाक्षिणात्यत्वं संभावयितुं शक्यम् ।

भारतचम्पूग्रन्थस्य हस्तलिखितपुस्तकानां बहुषु दक्षिणभारतीय पुस्तकालयेषु सुरक्षितत्वात्(१) अपि अनन्तकवेस्तन्निर्मातुर्दक्षिणाचलप्रभव त्वं संभावयितुं शक्यम् ।

भारतचम्प्वां पांचालिकायास्ताटङ्कवर्णनात्मके पद्ये -

ताटङ्कतरलमणिप्रभातरंगे तन्वंग्यामुखमभितस्तदाव्यभाताम् ।

मूर्तत्वं प्रकटमुपेत्य जागरूके वर्णे द्वे नयनविपाठ्योरिवान्ते ।।२।६१।

इत्यस्मिन् ताटङ्कयो: नयनविपाठशब्दस्यान्तिमवर्णठकाररूपेणोत्प्रेक्षणमुपल भ्यते । ठवर्णश्च दक्षिणाचलस्थितकर्णाटकादिदेशलिपिषु ठ एवं समध्यबिन्दु कं प्रचलितमासीत् इति तत्रत्यहस्तलिखितपुस्तकानामवलोकनेनावगन्तुं शक्यते (२) तेन अनन्तभट्टस्यदक्षिणापथप्रांचलप्रभवत्वं संभावयितुं शक्यते ।

उपर्युक्तै: संभावनाबीजैर्विद्वद्भिरनन्तभट्टस्य दाक्षिणात्यत्वं संभावितमासीत् , किन्त्वस्माभिरुपरि दर्शितेन अनन्तभट्टस्य अभिनवकालिदासवैरभाजन त्वेनतत्समकालिकत्वमिव तत्समदेशत्वमपि संभाव्यते । तेन अनन्तभट्ट: अभिनव कालिदास इव राजशेखरस्य राजधान्यां विद्यानगर एव निवसति स्मेति मन्तव्यम्।

---

१ एतत् डा० छविनाथस्य चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिक अध्ययन ग्रन्थे ११८ पृष्ठे द्रष्टुं शक्यम् ।

२ एतत् एतत् मुंबई निर्णयसागरप्रेसमुद्रितचम्पूभारतपुस्तकस्य ८० पृष्ठे टिप्पण्यां द्रष्टव्यम् ।

जातिः

अनन्तभट्टस्यकौ मातापितरावास्ताम् इत्यस्य प्रमाणाभावात् वक्तुमशक्यत्वेऽपि चम्पूभारतपुस्तकेषु तन्नाम्ना सह भट्टेत्युपाधेर्दर्शनात् तादृशोपाधेश्च दाक्षिणात्येषु एव उपलम्भात् असौ दाक्षिणात्यब्राह्मणजातीय आसीदिति वक्तुं शक्यम् ।

धर्मः :-

चम्पूभारते यज्ञविवाहादिवैदिकविधीनां वैदिकविधानुसारमेव वर्णनस्योपलम्भात् अनन्तभट्टः सनातनधर्मी वैदिको ब्राह्मण आसीदिति वक्तुं शक्यम् ।

उपास्यदेवः

ग्रन्थारम्भे देवतान्तराण्यस्मृत्वा भगवतो गणनाथस्यैव स्मरणात् तेनैव चमङ्गलाचरणविधिं पूरयन् कविरनन्तभट्टः स्वस्य प्रमुखतया भगवतो गणनाथस्योपासकत्वं प्रकटीकरोति ।

स्वभावः

अनन्तकविः स्वभावेन निर्भीकः स्वाभिमानी चासीदिति तस्य स्वकवित्वगुणप्रख्यापनपरेण चम्पूभारतग्रन्थान्तस्थिततत्प्रशस्तिपद्येन अवगन्तुं शक्यम्। यथा-

दिगन्तरलुठत्कीर्तिरनन्तकविकुञ्जरः ।
प्राणैस्तुल्यं सरस्वत्याः प्राणैषीच्चम्पूभारतम् ।।
उन्मीलदम्बुजकदम्बकसौरभीणामुन्नृत्यदीशमुकुटीतटिनीसखीनाम् ।
आचान्तवैरियशसाममृतोर्मिलानां वाचामनन्तसुकवेर्वसुधैव मूल्यम् ।। इति

एतत् पद्यद्वयं - डा० छविनाथलेखानुसारं (१) परकीयं मन्तव्यम् । भारतचम्पूलभ्यमानाया अनन्तकवेरचनाशैल्यानुसारमुक्तपद्ययो: प्रथमद्वितीयचरणयो:न्त उत् वर्णानां तृतीयचतुर्थचरणयोश्च प्राणं चा वर्णानां यमितत्वेन समुपलभ्यमानत्वात् ।

एवं चम्पूभारतस्यावलोकनेन प्रतीयते यत्- कविरसौ विस्तृतानामप्यर्थानां संक्षेपेण कथने, प्राचीनस्याप्यर्थस्य नूतनतयाऽरुचिरतया च वर्णने, स्थूलस्याप्यर्थस्य सूक्ष्मतया मार्मिकतया च प्रतिपादने नितरां निपुण आसीत् । साधारणानामप्यर्थानां वैचित्र्येण चमत्कारितया च प्रकाशने कवेरतीव पाटवमुपलभ्यते । । येन कवे: प्रतिभाख्यनवनवोन्मेषशालिमतिगुणवैभवसंपन्नत्वं साधु प्रकटीभवति ।

## अनन्तभट्टस्य वैदुष्यम्

चम्पूभारतस्याध्ययनेन एतद् बहु वेदितुं शक्यम् यत् अनन्तभट्ट: प्रखरया प्रतिभया सह विविधशास्त्राणां प्रगाढाध्ययनेनार्जितया विपुलया व्युत्पत्त्याऽपि सुतरां समाढ्य आसीत् । कविरयं प्रत्येकवस्तुनो वर्णनं प्रौढरुचिरै: शब्दै: समुचितै: सुविनिर्मितानां प्रसंगापेक्षितच्छन्दोमयानां पद्यानां गद्यानां वा कदम्बकै: विदधाति विनैवायासम् । अस्य वर्णनं प्रौढं सदपि प्रसन्नं प्रवाहपरिपूर्णं चोपलभ्यते सर्वत्रैव । तथैव च तत् समुचितैरलंकारैराकर्षकम् प्रसंगानुसारि मिश्च

---

१- एतत् डा० छविनाथस्य चम्पूकाव्यों का ----- अध्ययन ग्रन्थस्य १२१ पृष्ठे द्रष्टव्यम् ।

रसभावादिभिः चमत्कारकं मनोहरं च विद्यते । तेन कवेरस्य भाषाया उपरि असाधारणोधिकारः व्याकरणशास्त्रस्य प्रगाढपाण्डित्यं, छन्दसामुपरि ऐकाधिपत्यम्, अलंकारशास्त्रस्य गम्भीरं ज्ञानम्, प्रकटीभवन्ति । चम्पूभारते कविरसौ अलंकारान्तराणि श्लेषालंकारमपि प्राचुर्येण प्रायुङ्क्त, तेनास्य विविधशब्दकोषाधिपत्यमपि सरलतया प्रत्येतुं शक्यम् ।

एवमेव कवेरस्य वेद ज्योतिष शकुनशास्त्र मल्लविद्यावेदित्वं दर्शन राजनीति पुराणेतिहासादिविज्ञत्वं चापि चम्पूभारतावलोकेन प्रतीतिपथमवतरति ।

वर्णने कवेः समुचितानां छन्दसामुपयोगः , अपेक्षितानां शब्दार्थालंकाराणां निवेशः रसभावादीनां निर्वाहश्चाग्रे क्रियमाणैः तत्तद्विषयकैः विमर्शैः पार्थक्येन प्रदर्शयिष्यते । किन्तु कवेः व्याकरणादिशास्त्रवेदित्वं तु कतिचिन्निदर्शनैरत्रैवोपस्थाप्यते तत्र च -

## वैयाकरणत्वम्

चम्पूभारते बहुत्र एतादृशाः शब्दा उपलभ्यन्ते, ये प्रचुर- प्रक्रियासाध्या विशेषसूत्र साध्या वा सन्ति यथा -

प्रादिद्युतत् १।५०, दिदर्शयिषुणा १।१०, परिचिचित्साया १।४ आढ्यम्भविष्णुत्वम् ७।१०५, अलंकर्मीणः १।१३, पारदृश्वानो १।२७, पश्यतोहर- मेघङ्कर- पुष्पन्धय- ३।५३, नग्नङ्करणो ३।३५, शुभंयो २।६७, इत्यादिशब्दानां प्रयोगेण कवेः प्रगाढं वैयाकरणत्वं स्पष्टम् ।

व्याकरणप्रसिद्धपारिभाषिकशब्दप्रयोगो यथा -

अनयोरथदम्पत्योरस्तुहेतोः शुवः पदे ।
आनन्दस्यातिरेकोभूदादेश इव तत्क्षणम् ।।२। ४६ ।।

इत्यत्र व्याकरणप्रसिद्धः पारिभाषिक आदेश शब्दः उपमानवाचकत्वेन उपात्तः, एतेन कवेः व्याकरणशास्त्ररसिकत्वं प्रकटीभवति । एवम् -

अथ ब्रह्मशिरोऽस्त्रस्य प्रहित्य किरीटिना ।
योगात् तुलपदेनेव ह्रस्वभावं जगाम सा ।। १२।१६ ।।

अत्र सापदपरामृष्टाया अश्वत्थामप्रयुक्तास्त्ररूपाया इषीकाया: किरीटिना प्रहित ब्रह्मास्त्रयोगेन ह्रस्वभावे इषीका शब्दस्य तूलशब्द योगेन ह्रस्वभावो हि " इष्टकेषीकामालानां चिततूलभारिषु " इतिपाणिनी यानुशासनविधीयमानं उपमानतया दर्शितोऽपि कवे: प्रगाढं व्याकरणशास्त्र रसिकत्वं प्रत्याययति ।

वैदिकत्वम्

संप्रति कवेरनन्तभट्टस्य वैदिकत्वसूचकानि कतिचिन्निदर्शनानि प्रस्तूयन्ते, यथा -

परिपालयतोऽपि मे महीं परिपूर्तिर्न तनूजदुर्गते: ।
प्रजया हि मनुष्य इत्यसौ प्रथते हि श्रुतिवर्णपद्धति: ।।१।३१।

पद्येऽस्मिन् कविना " प्रजया हि मनुष्य: पूर्ण: " इत्यादिश्रुतिवाक्यं परामृश्यते । यथा च -

नह्यतीव विधिरप्यसुतानां नश्यते फलमिति श्रुतिसिद्धे: ।
जीवतो मम यथाऽस्वसाध्यो मीलतोऽपि न तथा परलोक: ।।१।३३।

पद्येऽस्मिन् कविना " जातपुत्र: कृष्णकेशोऽग्नीनादधीत, नापुत्रस्य स्वर्गलोकोऽस्ति " इत्यादय: श्रुतय आश्रिता: । यथा च -

निन्यन्ते पितृभिस्तप्तैर्निरपत्यधन: पुमान् ।
अध्वनीनैरतिश्रान्तैरवकेशीव पादप: ।। १। ३५ ।।

पद्येऽस्मिन् " एष वा अनृणी य: पुत्री " इति श्रुति: स्वतात्पर्यविषयतया स्मार्यते यथा च -

सतृणीव हरे विकृष्टचापे सशरं शैलसुतापि जातशङ्का ।
मघवत्सुतमङ्गलाय देवी मनसा यातइषु श्रुतिं जजाप ।।४।।८५।

पद्येस्मिन् मंगलकामनया प्रयोज्या' या त इषु: शिवतमाशिवं बभूव ते धनु:, शिवा शरव्याया तव तयानो रुद्र मृडय' इति श्रुति: परामृश्यते । यथा च -

मालिनी तादृशं पत्युर्म्लानिं तं रणोद्यमम् ।
श्यामाकचरु निर्वापं जज्ञे सोमाय वाजिने ।।७।१४ ।

अत्र षण्ढत्वनिर्वर्तको 'वैदिकप्रयोग:' सोमाय वाजिनेश्यामाकं चरुं निर्वपेद् य: क्लैब्याद् बिभीयात्' इति श्रुतिप्रतिपादित उत्प्रेक्ष्यते अर्जुनस्य रणोद्यमे ।

एभिर्निदर्शनै: कवे: वैदिकं वैदुष्यं स्फुटतया प्रतीयते ।

ज्योतिषशास्त्रज्ञानम्

---------------

संप्रति कवे: ज्योतिषशास्त्रसम्बन्धि वैदुष्यं प्रकटयितुं कतिचिन्निदर्शनानि प्रस्तूयन्ते, यथा -

तस्यामेव क्षपायांसपदि निजकुलोत्तंसपार्थोत्सिवाना
मालोकायैव साक्षाद्विशति हिमरुचौ यां शुभायां मुहूर्ते ।।२।८७ ।

इत्यत्र विवाहे संपन्ना चन्द्रबलस्य आवश्यकता ज्या ज्योतिषशास्त्रोक्ता प्रदर्शिता यथा च -

परस्परासंगफलप्रदित्सया स्वजन्मतारेन्दववासराविव ।
उपस्थितौ तावुपसृत्य संभ्रमात् स आशिषोनन्तरमेतमब्रवीत् ।२।१०५।।

अत्र जन्मर्क्षेण सह सोमवासरस्य योगे यथेष्टभोजनलाभरूपं फलं अध्वा भोजनमालस्यं विद्यावस्त्रं वरांगना मृत्युश्चेति क्रमाज्जन्मदार्कादिदिनयोगत:' इति ज्योतिषिकोक्तं दर्शितम् । यथा च -

तस्मिन् कवौ तापसयूथनाथे स्वातीमिवाजग्मुषि वासभूमिम् ।
तेषामतिक्षामतयायुतानां श्रुतादिदेशेष्वतिवृष्टिरासीत् ।।४।५३।।

अत्र कवे: शुक्रस्य वासभूमि: स्वातिनक्षत्रं ' शुक्रो वृषतुलाधिप: ' इति ज्योतिषशास्त्रोक्ता दर्शिता । तुलाराशे: स्वातिनक्षत्र घटितत्वेन तुलान्तर्गतस्वातेरपि शुक्रवासभूमित्वात् । ततश्च ' स्वातिं गते शुक्र इवातिवृष्टिरतिवृष्टि:' इति तच्छास्त्रीयोक्त्यनुसारं पद्येस्मिन् उपमानविधया कवौ स्वातिमाजग्मुषि अतिवृष्टिर्द-

र्शिता । यथा च -

नव्यं गुरुं भुवि न मार्गितुमुत्तराया: संरक्ष्य सूतमपि तादृशिसंप्रहारे
जन्मर्क्षजीवदिनयोगफलं च दातुं कन्यासुवत्स कथमैत्यकुरून् व्यजेष्ठा: ।७।६६

अत्र जन्मर्क्षे्ण जीवदिनस्य योगे वस्त्रलाभरूपं फलं ज्यौतिषिकेषु प्रसिद्धमुक्तम् ।

एवं दृश्यमानैर्निदर्शनै: कवे: ज्यौतिषशास्त्रसंबन्धि वैदुष्यं स्पष्टं प्रकटीभवति ।

## शकुनशास्त्रानुशीलनम्

संप्रति कवे: शकुनशास्त्रानुशीलनपरिचायकानि कतिचिन्निदर्शनानि प्रस्तूयन्ते । यथा च -

पार्थस्य तस्य तदनु प्रहिता वधाय भङ्गं ययौ पथि शरैर्भगदत्तशक्ति: ।
प्रस्थानकर्मसमये भयदायि तस्या नागस्य दर्शनमजायत यत्समीपे ।१०।२६।।

अत्र अर्जुनेन भगदत्तशक्तिभङ्गे कृते शक्तिप्रस्थानसमये नागदर्शनस्यापशकुनत्वं दर्शितम् । यथोक्तं शाकुनिकै: ' शशसर्पवृकादीनां दर्शनाद् भयमाप्नुयात् ' इति । यथा च -

पयसा परिपूरितौ घटौ परिपश्यन् पथि पाकशासनि: ।
कमलाकरकनीयसीकुचौ कलयामास करस्थिताविव ।२। ५२ ।।

अत्र सुभद्रालिप्सया चलितस्यार्जुनस्यपय: पूरितघटदर्शनं सुशकुनत्वेन दर्शितम् । यथोक्तं शकुनिकै: -

अग्रे धेनु: सवत्सा वृषगजतुरगा दक्षिणावर्तवह्नि:
दिव्यस्त्रीपूर्णकुम्भौ द्विजवरगणिकाश्वेतमालापताका ।
मत्स्यौ मांसं घृतं वा दधि मधु रजतं काञ्चनं शुक्लवस्त्रं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो गन्तुकाम: ।।इति।

एभिर्निदर्शनै: कवे: शकुन शास्त्रानुशीलनम् स्फुटी भवति ।

## मन्त्रविद्यावेदित्वम्

इदानीं कवे: मन्त्रविद्यावेदित्वसूचकान्युदाहरणानि प्रस्तूयन्ते यथा -

प्राग्वंशेऽप्युत्तमे तिष्ठन् प्राग्वंशं पुनराविशत् ।
कुरीरशिरसा पत्न्या कुरुवीरः स दीक्षितः ।४।८ ।।

अत्र मखविद्याप्रसिद्धं हविर्गेहस्य प्राग्वंशेति नामोपात्तम् । मख~~क्रिय~~ दीक्षितपत्न्याश्च कुरीरशिरस्कत्वं दर्शितम् ।

तत्र प्रवर्ग्यजनितं दिवि धूमचक्रमालक्ष्यते स्म विबुधान् प्रतिपावकेन ।
आनाकदुर्वहहविर्द्रविणेन वेगादाह्वानपत्रवलयं किलनीयमानम् ।४।११० ।।

अत्र हवनात्मककर्मविशेषस्य प्रवर्ग्येति मखविद्याप्रसिद्धं नामोल्लिखितम् । यथा च -

मेदस्विनं विपुलखाण्डवभक्षणेन देहं निजं चलयितुं शिखिनोऽदामस्य ।
उद्गम्य संज्वलितुमुत्तरवेदिकायामालम्बनाय किल यूपवरोऽन्तिकेऽभूत् ।४।१११

अत्र मखकर्मणि उत्तरवेदिकायां यूपाख्यो दारुविशेष आरोप्यत इति दर्शितम् । एतेन कवेर्मखविद्यावेदित्वं स्पष्टीभवति ।

योगशास्त्रानुशीलनम्

---

भारतचम्पूकाव्यस्यावलोकनेनावगम्यते यत् कवेः योगशास्त्रानुशीलनमप्यासीत् तन्निदर्शनं यथा -

अष्टाङ्गयोगानवतोऽस्य राज्ञो मिष्टान्नमासीत् मृदुकन्दमूलम् ।
गर्भोवनस्याऽजनि केलिसौधो दर्भोऽपि सिंहासनतां जगाहे ।१।२८ ।।

पद्येऽस्मिन् कविना योग शास्त्रप्रसिद्धानि यमनियमासनप्राणामप्रत्याहारध्यान धारणासमाधिनामकानि योगस्य अष्टाङ्गानि सूचितानि ।
एतेन कवेर्योगशास्त्रानुशीलनं प्रकटीभवति ।

काणादशास्त्रपरामर्शः

---

चम्पूभारतावलोकनेन कवेः काणादशास्त्रपरामर्शोऽपि दृग्गोचरो भवति ।

तदुदाहरणं यथा -

मदपङ्कललामगन्धिफालं मघवत्सूनुररेर्निपात्य शीर्षम् ।

पृथुलां मुदमादधे तदा ऽसौ पृथिवी गन्धवतीति गौतमोक्तै: ।१०।२६।।

अत्र गन्धवती पृथिवी इति काणादमतं प्रकटीकृतं कविना ।

एतेन कवे: काणादशास्त्रपरामर्श: स्पष्ट: ।

## राजनीतिशास्त्रावगाहनम्

---

संप्रति कवे: राजनीतिशास्त्रावगाहनं भारतचम्पूस्थनिदर्शनोपस्थापनेन प्रदर्श्यते, यथा च -

" तदनु तापसशापेन विरचितमनस्तापेन तेन भूपेन चतुरङ्गबलमिव सप्ताङ्गराज्यमपि व्यसृज्यत ।"

गद्येस्मिन् कविना राजनीतिशास्त्रप्रसिद्धानि हस्त्यश्वरथपादातरूपाणि चत्वारि बलाङ्गानि स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलरूपाणि सप्तराज्याङ्गानि च स्मारितानि । एतेन कवे राजनीतिशास्त्रावगाहनं स्फुटी भवति ।

## इतिहासपुराणानुशीलनम्

---

चम्पूभारतस्य महाभारतीयकथामूलकत्वात् इतिहासानुशीलनं तु कवेरनिवेदितमपि प्रकटमेव, किन्तु चम्पूभारते एतादृशानि निदर्शनानि अपि दृग्गोचरीभवन्ति यै: कवेरनन्तभट्टस्य महाभारतातिरिक्तेतिहासपुराणग्रन्थानामनुशीलनमपि प्रकटी भवति । यथा -

फालस्य भङ्गविशिखे पदयो: कृतान्ते हासस्य दानवपुरे ह्यवलोकनस्य ।

शम्बायुधे पशुपतेरवदानपद्यं गायन्ति सिद्धमिथुनान्यशृणोत् स तस्मिन्।३।३०

अत्र कविना शिवपुराणोक्तानि भगवच्चरित्राणि संदिप्य निबद्धानि सन्ति ।

शैलो गर्भे शिशुरिवभुव: शासनाद् यस्य शेते

वातापिं यो जठरदहने कल्पयामास हव्यम् ।
द्रौणीनङ्गीकरणमहिमा कौपलेशौ यदीय:
तस्यावासं दिशमभिययौ तापसस्येन्द्रसूनु: ।३।३५।।

अत्र कविना वाल्मीकीयरामायणोक्तं भगवदगस्त्यमुनेश्चरितं निबद्धमस्ति ।

सुतावलोकेन नरेन्द्रसुभ्रुवश्च्युताखिलेष्वश्रुषु सोदरात्ययात् ।
विलोचनाङ्गेष्वतिवृष्टिसंपदे विभाण्डकापत्यविजृम्भणायितम् ।७।७०।।

अत्रापि वाल्मीकीयरामायणोक्तं विभाण्डकमुनिसुतस्य ऋष्यशृङ्गमुनेरागमने जाते सति अङ्गदेशेषु महती वृष्टिरजायतेति वृत्तं निबद्धमस्ति । एभिर्निदर्शनै: कवेरितिहासपुराणानुशीलनं स्पष्टीभवति ।

एवं प्रसङ्गानुसारमुपात्तै: तैस्तैर्वेदशास्त्रादिगतैर्विषयै: कवेस्तत्तद्विषयकं वैदुष्यं तु प्रकटीभवत्येव, किन्तु प्रसङ्गाभावेन अन्यशास्त्रीयविषयनिवेशस्यासंभवत्वात् तदप्राप्तावपि उपलब्धैरेव वेदशास्त्रादिज्ञानपरिचायकैर्निदर्शनै: अनन्तभट्टस्य सर्वशास्त्रीयं व्यापकं वैदुष्यं स्वीकर्तव्यमेव । तादृशेन प्रगाढविदुषा कस्यापिशास्त्रस्यानुशीलनपरिहारस्यासंभवत्वेन तदीयसर्वशास्त्रानुशीलनस्य संभावनीयत्वात् ।

भारतचम्पूनिर्माणे प्रवृत्ति:
------- ----------

विविधविद्यावारिराशि: श्रीमाननन्तभट्ट: चम्पूकाव्यातिरिक्तं किमपि गद्यमयं पद्यमयं वा काव्यं महाकाव्यं वा महाभारतीयकथातिरिक्तं कमपि विषयमादाय रचयितुं प्राभवदेव, किन्तु तादृशस्य कस्यापि काव्यादिकस्य रचनामुपेक्ष्य यत् महाभारतीयकथावर्णनपरस्यचम्पूकाव्यस्यैव निर्माणे प्रवृत्तोभवत् , तत् कारणमन्ये - स्वसमये वर्तमानस्य अभिनवकालिदासस्य ' अभिनवपदपूर्व: कालिदास: प्रगल्भ: त्रिनयनदयिताया: प्रेमडिम्भस्तृतीय:' इति गर्वोक्तेरसह्यतैवासीत् । अन्यथा सोपि कविकर्मण्येव तत्रापि चम्पूकाव्यनिर्माण एव तत्रापि च अभिनवकालिदास इव भारतचम्पूभागवतचम्पूकाव्ययोरेव निर्माणे प्रवृत्त: कथमभवत् ? तत्रैव तत्प्रवृत्त्या तद्गर्वोक्तेरसह्यता स्पष्टैव ।

अत्र अनन्तभट्टीयचम्पूकाव्यस्यैव समीक्षा निबध्यते, येन विद्वांसो शास्यन्ति यत् अनन्तभट्टेन स्वकविकर्मणि कियती सफलता प्राप्तेति । किन्तु उपलभ्यमानेन अभिनवकालिदासीय भागवत चम्पूकाव्येन सहअनन्तभट्टीयभारतचम्पूकाव्यस्य तुलनापि पश्चात् ग्रन्थेऽस्मिन् प्रस्तोष्यते, विद्वांसस्तेन शास्यन्ति यत् -गर्वियमाणोऽपि अभिनवकालिदास: कविकर्मणि अनन्तभट्टस्य संमुखे कियतिनिम्ने स्तरेऽस्तीति । अस्तद्विषये नेह किमप्युच्यते , किन्हि विद्वद्भिस्तत्रैव तद् द्रष्टव्यम् ।

## काव्यम्

अनन्तभट्ट: अभिनवकालिदासस्य स्पर्धयैव काव्यनिर्माणे प्रवृत्तो जात:स्यान्नाम,किन्तु काव्यस्य कस्या अपि विधाया निर्माणे कस्याप्यस्तु प्रवृत्ति: सा - साधीयस्येव यदि भवति, तर्हि प्रतिस्पर्धयैव चम्पूभारतनिर्माणे कवेरनन्तभट्टस्यापि प्रवृत्ति: श्लाघ्यैव ।

यतो हि काव्यस्य स्वरूपपरिदर्शनविषये भवन्तु प्राचामाचार्याणां मतभेदा: , किन्तु काव्यस्य रमणीयत्वे नास्ति कस्यापि मतभेद: । भगवतो व्यासादारभ्य पण्डितराजजगन्नाथपर्यन्ता बहव आचार्या यदि काव्यस्य शब्दरूपतां स्वीकुर्वन्ति, तर्हि तत्कालान्त:पातिनोभामहरुद्रटवामनकुन्तकमम्मटवाग्भट्टाचार्या: - काव्यस्य शब्दार्थोभयरूपत्वं स्वीकुर्वन्ति । किन्तु काव्यस्य रमणीयत्वे नास्ति कस्यापि मतभेद:,तस्मिन् सर्वेषामैकमत्यमेव । तच्चात्र निम्नोक्तै: तदुक्तै: काव्यलक्षणै: स्पष्टीभवेदेव । यथा -

सर्वप्रथमं काव्यस्य लक्षणं भगवान् व्यास: ' संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्नापदावली काव्यम्' इत्यूचे । अत्र पदावलीप्रतिपाद्यार्थे इष्टत्वेन रमणीयत्वमेव स्पष्टं प्रतिपादित: (१) ।

---

१   अग्निपुराणे अ० ३३७ प०   ६।७ ।।

व्यासानन्तरं नाट्यशास्त्रकारो भरतमुनिः ' मृदुललितपदाढ्यं गूढशब्दार्थ-हीनं जनपदसुखबोध्यं युक्तिमान्नृत्ययुक्तं बहुकृतरसमार्गं सन्धिसन्धानयुक्तं भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ' इति वदन् काव्यस्य मृदुललितपदत्वेन रमणीयत्वमेव - प्रकटयति (१) ।

ततो व्यासमुनिमनुसरन् आचार्यो दण्ड्यपि तथैव ' शरीरं तावदिष्टार्थ-व्यवच्छिन्ना पदावली ' इति काव्यलक्षणं जगाद । अत्रापि इष्टार्थः पूर्ववत् रमणीय एव अभिमतः (२) ।

तत आनन्दवर्धनाचार्योऽपि तमनुसरन् ' काव्यविशेषो हि विशिष्टार्थप्रति-पत्तिहेतुः शब्दसंदर्भविशेषः ' इति काव्यलक्षणमब्रवीत् , अत्रापि विशिष्टार्थः च-मत्कारित्वेनैव तस्येष्टः (३) ।

ततो महराजो भोजोऽपि ' निर्दोषं गुणवत् काव्यमलंकारैरलंकृतम् रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ' इति स्वग्रन्थेस्मिन् काव्यस्य रमणीयत्वमेव स्वीचकार (४) ।

ततो राजशेखरः ' गुणवदलंकृतं च वाक्यमेव काव्यम् ' इति लिखन् स्व-ग्रन्थे काव्यं गुणालंकारवत्वेन रमणीयमेवस्वीचकार (५) ।

ततो महाकविर्जयदेवोऽपि ' निर्दोषा लक्षणवती सरीतिर्गुणभूषणा सालंकाररसानेकवृत्तिर्वाक् काव्यनामभाक् ' इति काव्यनाम्नींवाचं रसालंकारविशिष्टत्वेन रमणीयामेव स्वीचकार (६) ।

ततस्तथैवाचार्यः शौद्धोदनिरपि ' काव्यं रसादिमद् वाक्यं श्रुतं सुखविशे-ष-

---

१ नाट्य शास्त्रे १६।३३।१३४।।

२ काव्यादर्शे १।१० ।।

३ ध्वन्यालोके तृतीयोद्योते प्रथमकारिकावृत्याम् ।

४ सरस्वतीकण्ठाभरणे ।

५ काव्यमीमांसायाम् अ० ६ ।

६ चन्द्रालोके म०१ का० ७ ।

कृत्' इति वाक्यात्मनः काव्यस्य रसादिमत्त्वेन रमणीयत्वमेव प्रकटीचकार (१)

ततः कविराजो विश्वनाथोपि 'वाक्यं रसात्मकं काव्यम्' इति ब्रुवाणो वाक्यात्मनः काव्यस्य रसवत्त्वेन रमणीयत्वमेव स्वीचकार (२)

ततः आचार्यो गोविन्दठकुरोपि 'शब्दात्मनः काव्यस्य, वाक्यरूपस्य काव्यस्य, काव्यं च कविकर्म शब्द एव' इत्यादिवदन् शब्दरूपस्य काव्यस्यरसालंकारायन्यतरवत्त्वेन रमणीयत्वमेव प्रतिपादयामास (३)

ततो महाकविर्जगन्नाथः पण्डितराजोपि 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति वदन् प्रतिपाद्यार्थस्य रमणीयत्वेन तदनुरूपस्य तत्प्रतिपादकस्य काव्यस्यापि रमणीयत्वमेव प्रकटीचकार (४)।

एवं व्यासादयः शब्दकाव्यतावादिन आचार्याः येन केन प्रकारेण अर्थस्य रमणीयत्वं प्रतिपादयन्तः तत्प्रतिपादकस्य काव्यस्यापि तदनुसारित्वेन रमणीयतां स्वीकुर्वन्त्येव।

व्यासादारभ्य जगन्नाथपर्यन्तेषु शब्दकाव्यतावादिष्वाचार्येषु मध्ये मध्ये शब्दार्थोभयकाव्यतावादिनोपि बभूवुराचार्याः। तेपि यया कयाचित् विधया काव्यस्य रमणीयत्वमेव प्रकटीचक्रुः। यथा -

व्यासानन्तरं प्रथमःशब्दार्थोभयकाव्यतावादी आचार्यो भामहः 'शब्दार्थौ सहितौ काव्यम्' इति वदन्नपि स्वग्रन्थे गुणालंकारादिमत्त्वेन तस्य रमणीयत्वमेव प्रकटीचकार (५)।

ततो वामनोपि स्वग्रन्थे 'काव्यशब्दोयं गुणालंकारसंसृष्टयोः शब्दार्थयोर्वर्तते' इति काव्यस्यलक्षणं वदन् तस्य गुणालंकारसंस्कृतत्वेन रमणीयत्वमेव प्रकटीचकार (६)।

---

१ काव्यालंकारे।

२ साहित्यदर्पणे प्. १ का. ३।

३ काव्यप्रदीपे उ. ४ प. १६। १११।१६७॥

४ रसगंगाधरस्य प्रथम आनने।

५ भामहस्य काव्यालंकारे प्र. १ का. १६।

६ वामनस्यकाव्यालंकारसूत्रे अ. २ का. १।

तत आचार्यो रुद्रटोपि " ननु शब्दार्थौ काव्यम् " इति स्वग्रन्थे लिखन्नपि गुणालंकारादिविशिष्टत्वेन तस्य रमणीयत्वमेव प्रकटीचकार (१) ।

तत आचार्यः कुन्तकोपि " शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि - बन्धे व्यवस्थितौ काव्यम् तद्विदाह्लादकारिणि " इति स्वग्रन्थे शब्दार्थबन्धात्मककाव्यस्य आह्लादकारित्वेन रमणीयत्वमेव प्रतिपादयांचक्रे (२) ।

ततो मम्मटाचार्योपि " तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि " इति शब्दार्थयोः काव्यत्वं वदन् गुणालंकारादिमत्वेन काव्यस्य रमणीयत्वमेवं स्वीचकार (३)

ततो हेमचन्द्राचार्योग्रन्थे स्वकीये " अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यम् " इति वदन् सगुणालंकारत्वेन काव्यस्य रमणीयत्वमेवाह (४) ।

ततो वाग्भट्टाचार्योपि तथैव " शब्दार्थौ निर्दोषौ प्रायः सालंकारौ काव्यम् " इति वदन् गुणालंकारादिमत्वेन काव्यस्य रमणीयत्वमेव प्रतिपादयांचक्रे(५

एवं भामहादयः कतिचिदाचार्याः शब्दार्थकाव्यतावादिनो व्यासादिभ्योभिन्नमताः सन्तोपि काव्यस्य रमणीयत्वे त्वभिन्नमता एव । एवं सर्वेषामपि काव्यस्य रमणीयत्वमभिमतम् ।

## काव्यस्य भेदाः

संप्रतिरमणीयत्वेनाभिमतस्य काव्यस्य भेदा उच्यन्ते । तत्र यदा कवयो जागतिक वस्तूनि साधारणान्यपि स्वकीयेन प्रखरप्रतिभाप्रकाशेन नवनवेनासाधारणरूपेण पश्यन्ति: केचित् रंगमंचेषु सम्यजनदर्शनयोग्यकाव्यगतपात्रव्यापारया रु-

---

१ रुद्रटस्य काव्यालंकारे अ. १ का. ८ ।

२ वक्रोक्तिजीविते प. १ का. ८

३ काव्यप्रकाशे ए. १ का. ४ , ४ काव्यानुशासने प. १ का. ११

५ काव्यानुशासने प. १ का. १४

विरुचिरया गिराप्रकाशयितुमिच्छन्ति, तर्हि केचित्तानि श्रवणमात्रग्राह्ये काव्य-प्रतिपाद्यैव गिरा प्रतिपादयितुमिच्छन्ति । तदेवं सभ्यजनग्रहणशक्तिविषयताभेदात् काव्यस्य प्राग् दृश्यत्वेन श्रव्यत्वेन च द्वैविध्यमेव । तदुक्तं साहित्य दर्पणे -

दृश्यश्रव्य विभेदेन पुनः काव्यं द्विधा मतम् ।
दृश्यं तत्राभिनेयं तत् ६ ।१ ।।
श्रव्यं श्रोतव्य मात्रं तत् ।६।३१३ ।।

तत्र दृश्यकाव्यस्य रूपकोपरूपकनाटकनाटिकादयो नैके भेदाः । श्रव्यकाव्य-स्यापि प्राक् पद्यगद्यमिश्ररूपैः त्रयो भेदाः । तत्र पद्यकाव्यस्य महाकाव्य खण्डकाव्य-मुक्तकादिरूपैः , गद्यकाव्यस्यकथाख्यायिकादिरूपैः , मिश्रकाव्यस्य च चम्पूपदवाच्य-प्रबन्धरूपेण राजकीयविरुदघोषणादानादिपत्ररूपैश्च चतुर्भेदता । तेषां लक्षणोदाहरणानि काव्यादर्शसाहित्यदर्पणादौविस्तरशो निरूपितानि पिष्टपेषण-स्य वैरस्याधायकत्वेपि केश्चित् स्वग्रन्थकलेवरवर्धनाय मुधोपात्तान्यपिनेहनिरर्थकमुपन्य-स्यन्ते । तद्विस्तरो जिज्ञासुभिस्तत्रैव द्रष्टव्यः ।

~~भारतचम्पूकाव्यम्~~

------------

~~उपक्रमः~~

------

एवं काव्यसरस्वत्या विद्यमानास्वपि पीयूषयूषरसपरिपूर्णासु विविध-धारासु सिद्धसरस्वतीकाः कवयः केचित् दृश्यमेव काव्यं कवयन्ति, यथा भवभू-त्यादयः । केचित् श्रव्यं निबध्नन्तः पद्यरचनाचातुर्यमेव प्रकटयन्ति, यथा माघभार-व्यादयः । केचित् गद्यनिगुम्फनैपुण्यमेवोद्गिरन्ति, यथा बाणहर्षादयः । केचित् पुनः "गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते" इति विश्वनाथकविराजोक्तं गद्यपद्यम-योभयविधाविराजमानं चम्पूकाव्यमेव रोचयन्ति रचयितुम् (१) ।

------------------------------------------------------------

१   साहित्यदर्पणे प. ६ का. ३३६ ।

## चम्पूकाव्यानामुद्भवो विकासो ह्रास उपलब्धिश्च

### उद्भव:

तत्र संस्कृत साहित्यस्य चम्पूकाव्यस्य चेतिहासं लिखन्तोविबुधा:केचिद् गद्यपद्यात्मक प्रबन्धरूपस्य चम्पूकाव्यस्योद्भवं विक्रमस्य दशमशताब्द्यां मन्यन्ते, यतोहि सर्वत: प्राक् त्रिविक्रम भट्टस्य "नलचम्पू:" ततश्च सोमदेवनिर्मिता "यशस्तिलकचम्पू" श्च दशम शताब्द्यामेव प्रादुर्भूताम्, इति तु सत्यमेव, किन्तु काव्यशैल्या लिखितानां गद्यपद्यानां मिश्रितरूपस्य दर्शनंतु विक्रमस्य द्वितीय शताब्द्याम् आर्यसूरस्य "जातकमालायाम्" एव जायते, न तु तत: प्राक्, इतियत्तैर्मन्यते, (१) तत्र ब्रूम: -

काव्यशैल्या लिखितानां पद्यगद्यानां मिश्रितरूपस्य दर्शनं न केवलं विक्रमस्य द्वितीय शताब्द्यामेव भवति अपितु ततोऽपि बहो: कालात् प्राक् उपनिषत्सु ब्राह्मणेषु संहितासु चाऽपि तद् द्रष्टुं शक्यते। यतो हि "काव्यं नाम रमणीयौ शब्दार्थौ रमणीयार्थकशब्दावली वा" किमव्युच्यताम्, तदनुसारं काव्यरूपतामापन्नानां गद्यानां पद्यानां च नास्ति न्यूनत्वम् उपनिषत्सु ब्राह्मण ग्रन्थेषु संहितासु च। विस्तृततरस्यास्य साहित्यस्य सकलेभ्योऽपि स्थलेभ्यो गृहीतानां निदर्शनानां प्रदर्शनेतु भवेन्महानेव विस्तर: न च तदिष्टमपि कस्याऽपि, अत: कासां चिदुपनिषदां कानि चिन्निदर्शनान्यत्र प्रस्तूयन्ते, स्थालीपुलाकन्यायेन तत एव भवेद् विदितं सर्वमपि सुज्ञानाम्। तत्र -

(१) ईशावास्योपनिषदि यथा

(२) ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मागृध:कस्य स्विद् धनम् ।।१।।

---

(१) बलदेवोपाध्यायस्य "संस्कृतसाहित्य का इतिहास" ग्रन्थस्य ४१८ पृष्ठे, तथा छविनाथत्रिपाठित: "चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिक अध्ययन" ग्रन्थस्य ६५ पृष्ठे द्रष्टव्यम्।

(२) "ईशादिदशोपनिषद:" इतिग्रन्थस्य "मोतीलाल बनारसीदास" प्रकाशितस्य १ पृष्ठे।

अत्र मतिभावो व्यज्यते, तेन ध्वनिकाव्यमिदम् एवं द्वितीयं तृतीयं च पद्यमपि ।

" अनेजदेकं मनसोजवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद् धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपोमातरिश्वा दधाति ।।४।।

" तदेजति तन्नैजति तद्दूरे तद्वदन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्याऽस्य बाह्यत: ।। ५ ।।

अत्र पूर्वपद्ये अनेजितृत्व-जवीयस्त्वयो: सामानाधिकरण्योक्त्या विरोधाभास:, मनसोऽप्यतिजवनत्वोक्त्या व्यतिरेक:, धावतामतिक्रमणरूपकार्यस्य तद्धेतुभूतातिधावित्वाभावसामानाधिकरण्येन स्थित्या कथनाद् विभावना, उत्तरपद्येच एजनाऽनेजनयोर्दूरस्थाऽन्तिकस्थत्वयो? सर्वान्त: स्थबाह्यत्वयोर्विरुद्धयो: सामानाधिकरण्येनोक्तत्वाद् विरोधाभासा: ब्रह्मणोऽचिन्त्यमाहात्म्यत्वमनन्त शक्तिसम्पन्नत्वं सर्वथा भजनीयत्वं च ध्वनयन्ति, तेन तद्विषयको रतिभाव: परिपोष्यते ।

" वायुरनिलममृतमथेदं भस्मान्तं शरीरम् । ओम् क्रतोस्मर,कृतंस्मर, क्रतो स्मर, कृतं स्मर ।। १७।।

अत्र पद्येन अन्तकाले भगवत्प्रार्थनया तद्विषयो रतिभावो धृतिमत्यादिभावपोषितो ध्वन्यते ।

एवं मिश्रकाव्यस्योपलब्धिर्भवति ईशावास्योपनिषदपि ।

(२) कठोपनिषदि पञ्चमवल्ल्याम् यथा (१) -

"" य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण : ।"
" तदेव शुक्रं तद् ब्रह्म तदेवाऽमृत मुच्यते ।
तस्मिंल्लोका: श्रिता: सर्वे तदुनाऽत्येति कश्चन ।।८।।

- - - - - - - - - - - - - - - - - - - - - - - - -

(१) " ईशादिदशोपनिषद: ग्रन्थस्य ६७ पृष्ठे ।

" एतद्वैतत् " ।

" अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बभूव ।। ६।।

इत्यादिगद्यपद्यै: परमात्मनोऽचिन्त्यमाहात्म्यत्वमनन्तशक्तिमत्त्वं भवनीयत्वं च ध्वन्यते , तेन तद्विषयको रतिभावो व्यज्यते। अत्रोपमालंकार: प्रकृतोपस्कारक एव ।

(३) प्रश्नोपनिषदि षष्ठप्रश्नेयथा (१) -

" स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिराप: पृथिवीन्द्रियमन: अन्नमन्नाद्वीर्यं तपो मन्त्रा: कर्मलोका लोकेषु च नाम च " ।।४।।

" स यथेमा नद्य: स्यन्दमाना: समुद्रायणा: समुद्रं प्राप्याऽस्तं गच्छन्ति, भिद्येते तासां नाम रूपे, समुद्र इत्येवं प्रोच्यते । एवमेवाऽस्य परिद्रष्टुरिमा: षोडश कला: पुरुषायणा- पुरुषं प्राप्याऽस्तं गच्छति, भिद्येते तासां नामरूपे, पुरुष इत्येवं प्रोच्यते।स एषोऽकलोऽमृतो भवति, तदत्र श्लोक: ।। ५।।

" अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिता:।
वेद्यं पुरुषं वेद यथा मा वो मृत्यु: परिव्यथा,इति ।।६।।

अत्र गद्याभ्यां पद्येन च ब्रह्मणो लोकोत्तरं माहात्म्यं सेव्यत्वं च व्यज्यते, तेन च तद्विषया रति: प्रतीयते। उपमालंकारश्चाऽत्रोपस्कारक: ।

(४) मुण्डकोपनिषदि प्रथम मुण्डके प्रथम खण्डे यथा-(२)

" " अथ परा, यया तदक्षरमधिगम्यते " ।। ५ ।।

" यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षु:श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीरा: " ।। ६ ।।

" यथोर्णनाभि: सृजते गृह्णते च यथा पृथिव्यामोषधय: संभवन्ति।
यथा सत: पुरुषात् केशलोमानि तथाऽक्षरात् संभवतीह विश्वम् ॥ ।।७।।

अत्र गद्यपद्याभ्यां प्रतिपाद्यया पराख्यया विद्यया ब्रह्मणो महामहिमत्वं विज्ञेयत्वं ध्येयत्वं सेव्यत्वं च ध्वन्यन्ते,तेन तद्विषया रतिश्च प्रतीयते ।

(१-२ टिप्पणी पर पृष्ठे)

अत्र मालोपमालंकार: प्रकृतोपस्कारक: ।

तत्रैव द्वितीयमुण्डके द्वितीयखण्डे यथा-

" तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मन: ।
तदेतत् सत्यं तदमृतं तद्वेद्धव्यं सौम्य विद्धि " ।।२।।

" धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासा निशितं संदधीत ।
आयम्य तद् भावगतेन चेतसा लक्ष्यं तदेवाऽक्षरं सौम्यविद्धि "।३।

" प्रणवो धनु:शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेनवेद्धव्यं शरवत् तन्मयो भवेत् ।। ४ ।।

अत्र नवपद्येषु परमात्मन: स्वरूपवर्णनेन तन्माहात्म्यं तदुपासनाविधानेन च इद्विषयो रतिभावो ध्वन्यते । तत्र रूपकातिशयोक्त्युपमालंकारास्ध्यन्युपस्कार: ।

तत्रैव तृतीय मुण्डके द्वितीय खण्डे यथा -

" नाऽयमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य: तस्यैष आत्मा विवृणुते तनुं स्वाम् ।।३।।

" यथा नद्य: स्यन्दमाना: समुद्रेऽस्तं गच्छंति नामरूपे विहाय ।
तथा विद्वान् नाम रूपाद्विमुक्त: परात् परं पुरुषमुपैति दिव्यम् ।।८।।

" स यो ह वैतत् परमं ब्रह्मवेद ब्रह्मैव भवति, नास्या ब्रह्मवित्कुले भवति तरति शोकं ,तरति पाप्मानम् , गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति।।६।।

अत्र पद्यै: गद्येन च परमात्मनो माहात्म्यं ध्वन्यते । तत्र तृतीय पद्ये तस्य परमकारुणिकत्वमशरणा शरणत्वं चाऽपि व्यज्यते, तेन " तं भजमाना असाधना अपि तं प्राप्नुवन्ति " इति विभावनालंकारो व्यज्यमानो व्यङ्ग्यं तद्विषयकं रतिभाव मुपस्क रोति ।

(५) तैत्तिरीयोपनिषद: शान्तिपाठे यथा -(३)

---

(१) " ईशादिदशोपनिषद: ग्रन्थस्य ४२१ पृष्ठे।

(२) " ईशादिदशोपनिषद: ग्रन्थस्य ५०० पृष्ठे ।

(३) " ईशादिदशोपनिषद: " ग्रन्थस्य ३३७ पृष्ठे।

" शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
शं न इन्द्रो बृहस्पतिः शं नो विष्णु रुरुक्रमः ।।"

" नमो ब्रह्मणे नमस्ते वायो, त्वमेव प्रत्यक्षं ब्रह्मासि, तन्मामवतु।।"

अत्र पद्यगद्याभ्यां विविधस्वरूपवति ब्रह्मणि —
माहात्म्यज्ञान पूर्वको रतिभावो धृतिमत्यादि भाव संवलितो व्यज्यते ।

(६) छान्दोग्योपनिषदि चतुर्विंशखण्डे पञ्चम प्रपाठके (१)यथा-
"प्रथम एतदेवं विद्वानग्निहोत्रं जुहोति, तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति" ।। २।।

" तद्यथेषीका तूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति ।। ३ ।।

तस्माद् हैवं विद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतं स्यादिति, तदेष श्लोकः ।। ४ ।।

" यथेह क्षुधिता बाला मातरं पर्युपासत ।
एवं सर्वाणि भूतानि अग्नि होत्र मुपासत इत्याग्नि होत्रमुपासत इति ।। ५ ।।

अत्र गद्यपद्यैरग्निहोत्रस्य माहात्म्यं सेव्यत्वं च ध्वन्येते । तत्र द्वितीये गद्ये विशेषालंकारः तृतीये उपमा, चतुर्थे वाक्यार्थ रूपकम् ,पञ्चमे पद्येच पुनरुपमा प्रकृतार्थमुपस्कुर्वन्ति ।

(७) आथर्वण्यां मैत्र्युपनिषदि, कृष्ण यजुर्वेदीय मैत्रायण्युपनिषदि, मैत्रायण्यारण्यके चतुर्थे प्रपाठके यथा (२) -

" अथाऽन्यत्राऽप्युक्तं महानदीषूर्मय इवाऽनिवर्तकमस्य यत्पुराकृतं समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनं सदसत्फलमयैः पाशैः पशुरिव बद्धं बन्धनस्थस्येवाऽस्वातन्त्र्यं यमविषयस्थस्येव बहुभयावस्थं मदिरोन्मत्त इव मोहमदिरोन्मत्तं पाप्मना गृहीतमिव भ्राम्यमाणं महोरग दष्टइव विषय दष्टं महान्धकारमिव रागान्धम् इन्द्रजालमिव मायामयं स्वप्नइव मिथ्यादर्शनं कदली

(१-२ टिप्पणी पर पृष्ठे)

गर्भ इवा,सारं नट इव क्षणवेषं चित्रभित्तिरिव मिथ्या मनोरममित्यथोक्तम् ।

" शब्दस्पर्शादयो ह्यर्था मर्त्येऽनर्था इव स्थिताः ।
येषां सक्तस्तु भूतात्मा न स्मरेत् परमं पदम् ।।२।।

अत्र गद्यपद्येषु उपमारूपकोत्प्रेक्षाभिरुपस्कृतो वितर्कमत्यसूयादिभावैः परिपुष्टो निर्वेदः शान्तरसतया पर्यवस्यन् कियच्चमत्करोतीति न विदामविदितम् ।

तत्रैव पञ्चम प्रपाठके यथा -

" अथ यथेयं कौत्सायनी स्तुतिः -

" त्वं ब्रह्मा त्वं च वै विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः ।
त्वमग्निर्वरुणो वायुस्त्वमिन्द्रस्त्वं निशाकरः ।।"

" त्वमन्नस्त्वं यमस्त्वं पृथिवी त्वं विश्वं त्वमथाच्युतः ।
स्वार्थे स्वाभाविकेऽर्थे च बहुधा संस्थितिस्त्वयि ।।"

" विश्वेश्वर नमस्तुभ्यं विश्वात्मा विश्वकर्मकृत् ।
विश्वभुग् विश्वमायुस्त्वं विश्वक्रीडारतिः प्रभुः ।।

" नमः शान्तात्मने तुभ्यं नमो गुह्यतमाय च ।
अचिन्त्यायाऽप्रमेयाय अनादिनिधनाय च ।।१।।

तमो वा इदमग्र आसीदेकं तत्परे स्यात्तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्वस्य रूपं तत्सत्वमेवेरितं रसः संप्रास्रवत्, सोंऽशोऽयं यश्चेतामात्रः प्रतिपुरुषः क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वेत्यस्य प्रागुक्ता एतास्तनवः ।

अथ यो ह खलु वावास्य तामसोंऽशोऽसौ स ब्रह्मचारिणो योऽयं रुद्रोऽथ यो ह खलु वावास्य राजसोंऽशोऽसौ स ब्रह्मचारिणो योऽयं ब्रह्माऽथ यो ह खलु वावास्य सात्त्विकोंऽशोऽसौ स ब्रह्मचारिणो योऽयं

- - - - - - - - - - - - - - - - - - - - - - - - - - -

(१) ईशादिदशोपनिषदः" ग्रन्थस्य २४३ पृष्ठे ।

(२) " आनन्दाश्रम ग्रन्थावली-पुण्यपत्तनात्" प्रकाशितस्य 'उपनिषदां समुच्चयः,इति ग्रन्थस्य ३४५पृष्ठे संकलितायाः'मैत्र्युपनिषदः" स्वाध्यायमण्डल-औन्धात्" प्रकाशितायाः " कृष्णयजुर्वेदीय मैत्रायण संहितायाः " परि-शिष्टांशे संकलितायाः " मैत्रायण्युपनिषद" श्च समानान्यक्षराणि सन्ति,तत्संपादकैःतत्प्रस्तावनायां २० पृष्ठेषु ग्रा प्राचीनैव मन्यते ।

विष्णु: स वा एष एकस्त्रिधा भूतो<sub></sub>ऽष्टधा एकादशधा द्वादशधाऽपरिमितधा वोद्भूत: उद्भूतत्वाद् भूतं भूतेषु चरति प्रविष्ट: स भूतानामधिपतिर्बभूवेत्यसा, आत्माऽन्तर्बहिश्चाऽन्तर्बहिश्च ।। ३।।

अत्र ब्रह्मणो माहात्म्य - विश्वरूपत्व-सर्वशक्तिमत्त्वादिप्रतिपादनेन रतिभावविषयत्वं भजनीयत्वं च ध्वन्येते ।

(८) कैवल्योपनिषदि यथा (१)-

" मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद् ब्रह्मास्म्यहमद्वयम् ।।१६।।
" अणोरणीयानहमेव यद्वन्महानहं विश्वमहं विचित्रम् ।
पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ।।२०।।
" अपाणिपादोऽहमचिन्त्यशक्ति: पश्याम्यचक्षु: सशृणोम्यकर्ण: ।
अहं विजानामि विविक्तरूपो न चाऽस्तिवेत्ता ममचित् सदाऽहम् ।।२१।।
" वेदैरनेकैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाऽहम् ।
न पुण्यपापे ममनाऽस्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति ।।२२।।
" न भूमिरापो न च वह्निरस्ति न चाऽनिलो मेऽस्ति न चाऽम्बरं च।
एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ।। २३।।
" समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ।। २४।।

" य: शतरुद्रीयमधीते सोऽग्निपूतो भवति, सुरापानात् पूतो भवति, ब्रह्महत्यात् पूतो भवति, कृत्याकृत्यात् पूतो भवति , तस्मादविमुक्तमाश्रितो भवति। अत्याश्रमी सर्वदा सकृद्वा जपेत् ।"

" अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् ।
तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते, कैवल्यं फलमश्नुते।।१।।"

अनेन गद्यपद्यमयबन्धेन ब्रह्मणोऽचिन्त्यमाहात्म्यत्वं नि:सीमशक्तिमत्त्वं च ध्वन्येते, तेन तस्याऽद्भुतत्वस्य ध्वनि: ,तेन तस्य भजनीयत्वं तद्विषयको रतिभावश्च ध्वन्येते । वस्तुध्वन्यो रद्भुतेऽङ्गता, अद्भुतस्यच रतौगुणीभावाद् रसवदलंकारता गुणीभूतव्यङ्ग्यता वा । वाच्या विरोधाभासे

- - - - - - - - - - - - - - - - - - - -

(१) [illegible] (१)टिप्पणी पर पृष्ठे)

विभावनात्मकालंकारा अपि वेस्तुध्वन्युपरस्कारका: । कोमलकाल पदावल्यपल दिाता उपनानगरिका वृन्तिरपि भावध्वन्यनुकूला ।

(६) गोपालोत्तरतापनीयोपनिषदि यथा (२)-

" तमेकं गोविन्दं सच्चिदानन्द विग्रहं पञ्चपदं वृन्दावने सुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि ।

" ॐ नमो विश्वरूपाय विश्वस्थित्यन्त हेतवे ।
विश्वेश्वराय विश्वाय गोविन्दाय नमोनम: ।।१
नम: कमलनेत्राय नम: कमल मालिने ।
नम: कमल नाभाय कमलापतये नम: ।।३
" बर्हापीडाभिरामाय रामायाऽकुण्ठमेघसे ।
रमामानस-हंसाय गोविन्दाय नमोनम: ।।४
" बल्लवी नयनाम्भोज मालिने नृत्य शालिने ।
नम: प्रणतपालाय श्रीकृष्णाय नमो नम: ।।७
" प्रसीद परमानन्द प्रसीद परमेश्वर ।
आधिव्याधिभुजङ्गेन दष्टं मामुद्धर प्रभो ।।१०
" श्रीकृष्ण रुक्मिणीकान्त गोपीजन मनोहर ।
संसार सागरे मग्नं मामुद्धर जगद्-गुरो ।।११

"अथ एवं स्तुतिभिराराधयामि ,तेयूयं यथा पञ्चपदं जपन्त: श्रीकृष्णं ध्यायन्त: संसृतिं तरिष्यथेति सहोवाच हैरण्य: ।"

अनेन कोमल कान्त पदावल्युपलदितोपनागरिकावृत्त्या गुम्फितेन गद्य पद्यगुम्फेन भगवद्विषया रतिर्ध्वन्यते । बल्लवीनां नयनाम्भोज विषयत्वेन तासां

---

(१) " आनन्दाश्रम ग्रन्थावली, पुण्यपत्तन" प्रकाशितस्य " उपनिषदां समुच्चय:" ग्रन्थस्य १०१ पृष्ठे ।

(२) " उपनिषदां समुच्चय" इतिग्रन्थस्य १८३ पृष्ठे ।

भगवति परमासक्तिरनुरामश्च ध्वन्येते । नेत्रे कमलोपमा मानसहंसेत्यत्र श्लिष्ट-शिलस्ट परम्परितरूपकं च नयनाम्भोजाऽऽधिव्याधि-भुजङ्ग संसार सागरेत्यत्र निरङ्गरूपकाणि यमकानुप्रासाश्च गुम्फस्य कामप्यपूर्वां चमत्कृति मुर्वरयन्ति।

(१०) रामोत्तरतापिन्युपनिषदि यथा (१) -

" स होवाच याज्ञवल्क्यः श्रीरामेणैवं शिक्षितो ब्रह्मा पुनरेवं गदया गाथया नमस्करोति ।"

" विश्वाधारं महाविष्णुं नारायणमनामयम् ।
परिपूर्णानन्दविज्ञं परज्योतिस्वरूपिणम् ।।
मनसा संस्मरन् ब्रह्मा तुष्टाव परमेश्वरम् ।।"

ॐ यो वै श्रीरामचन्द्रः सभगवान् द्वैतपरमानन्दात्मा, ——— यः परं ब्रह्म भूर्भुवः स्वस्तस्मै वै नमोनमः ।। १ ।। ओम् यो वै श्रीरामचन्द्रः स भगवान् यश्चाखण्डैकरसात्मा भूर्भुवः स्वस्तस्मै वै नमोनमः ।। २।।

इत्यादि गद्यपद्यनयबन्धेन भगवतो माहात्म्यं रतिभावश्च ध्वन्येते । वृत्त्यनुप्रासः ,सुकुमार मधुरपद प्रचुरोपनागरिकावृत्तिः , प्रसादमाधुर्ये गुणौ च ध्वन्यनुकूलावेव ।

(११) हंसोपनिषदि यथा + (२) -

" ब्रह्मदृश्यं नवमे देहं दिव्यचक्षुस्तथाऽमलम् ।
दशमं परमं ब्रह्म भवेद् ब्रह्मात्मसन्निधौ ।। ११।।

" तस्मिन् मनो विलीयते, मनसि संकल्पविकल्पेदग्धे पुण्यपापे,सदाशिवः शक्त्यात्मा सर्वत्राऽवस्थितः स्वयं ज्योतिः शुद्धो नित्यो निरञ्जनः प्रकाशत इति ।।"

---

(१) " उपनिषदांसमुच्चयः" इतिग्रन्थस्य ५४६ पृष्ठे ।

(२) " उपनिषदां समुच्चयः " इतिग्रन्थस्य ५६८ पृष्ठे ।

अत्र गद्यपद्यमयबन्धे वर्णितेन ब्रह्मविद्यामाहात्म्येन तद्विषयको धृति-मत्यादिभावसंवलितोऽनुरागो ध्वन्यते । प्रसन्नमधुरा सुकुमारकमनीयाच पदावली तदनुरूपैव ।

एवं सन्ति बहूनि निदर्शनानि औपनिषदे साहित्येऽपि गद्यपद्यमयकाव्यानाम् , यानि पश्यन्तोऽपि न पश्यन्ति हन्त विचक्षणा विलक्षणाः(१) तेहि -

" कनकगिरिशिलाविशालवक्षाः शरदमलेन्दुमनोज्ञवक्त्रशोभः ।
कनकपरिघपीनलम्बबाहुः वृषभनिभेक्षणविक्रमो नरेन्द्रः ।।११।।
- जातकमालायां मैत्रीबलजातके,

" निदाघकाले ज्वलितो विवस्वान् ज्वालाभिवर्षीव पटुश्च वायुः ।
ज्वरातुरेवाऽशिशिरा च भूमिस्तोयानि रोषादिव शोषयन्ति।।४
- मत्स्यजातके ।

" क्रमेण चाऽव जगाहिरे विविधमीनकुलविचरितमनिभृतजलकलकलारावमनिलबल विलासप्रविचलिततरङ्गबहुविधरत्नैर्भूविशेषैरर्पितरङ्गफेनावलीकुसुमदामविचित्रमसुरवासभुजगभवनं दुरापपातालमप्रमेयतोयं महासमुद्रम् ।" ७ जातकमाला ,

" एषा हिमांशुमणिनिर्मितदेहयष्टि -
स्त्वं चन्द्रचूर्णरचितावयवश्च साक्षात् ।
एवं न चेत् कथमियं तव संगमेन
प्रत्यङ्गनिर्गतजला सुतनुश्चकास्ति ।। २।२१६।।
- यशस्तिलकचम्प्वाम् ,

एतादृशानि अर्वाचीनानि गद्यपद्यानि काव्यनिमन्यन्ते । किन्तु सालंकाराणि प्राकृतिकवर्णनानि, वीररसयुतानि वीरभटचाटूक्तानि,शृङ्गारसंवलितानि कामककामुकीनां वर्णनानि वाकोवाक्यानि तु काव्यानि भवेयुः मानवजीवनस्य नि-

- - - - - - - - - - - - - - - - - - - - - - - - - -

(१) " चम्पूकाव्य का आलोचनात्मक एवं ऐतिहासिक अध्ययन" इतिग्रन्थस्य ६५,६६,३२६ पृष्ठेषु द्रष्टव्यम् ।

यपिकाणि समुन्नायकानिच पारमार्थिकतत्त्वरूप-ज्ञानविज्ञान प्रतिपादनपराणि धृतिमति निर्वेदादिभावमिश्रिताऽद्भुत भक्तिशान्त रससारसुधासंभृतानि रसायन रूपाणि प्राचीनानि गद्यपद्यानि काव्यानि न भवेयुरित्यत्र नास्ति किमपि प्रमाणम् । प्रत्युत-

" काव्यस्यात्मा स एवाऽर्थस्तथा चाऽऽदिकवेः पुरा ।
क्रौञ्च द्वन्द्व वियोगोत्थः शोकः श्लोकत्व मागतः ।।५।।

" रसभावतदाभास भावशान्त्यादि क्रमः।
ध्वनेरात्माऽङ्गिभावेन भासमानो व्यवस्थितः ।।" ३।२।

" मुख्या महाकवि गिरामलंकृतिभृतामपि ।
प्रतीय मानच्छायैषा भूषा लज्जेव योषिताम् ।।" ३८।३।

- ध्वन्यालोके,

इति प्रामाणिकाग्रेसराचार्यवचनानुसारं शृङ्गारवीरादि व्यञ्जकानीव निर्वेद धृतिमतिरतिभक्तिशान्तादि व्यञ्जकान्यपि गद्य पद्यानि काव्यानि भवेयुरेव। यमकानुप्रासकौतुक प्रदर्शनावेशेन लिखितेष्वर्वाचीन काव्येष्विव, औपनिषदेषु गद्यपद्येषु यदि तथा यमकानुप्रासानां प्राचुर्यं नास्ति, तर्हि तन्न प्रतिकूलम् । यतो हि शृङ्गारात् संयोगात्मकात् विप्रलम्भस्य तस्माच्च शान्तस्य सुकुमार मधुरतरत्वं स्वीकृत माचार्यैः (१) तत्र च -

ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ।।" १६।२ ध्वन्या ।इति

ब्रुवन्तस्ते शृङ्गारेऽपि यमकादि निबन्धनं प्रमादित्वं मन्यन्ते, तदा ततोऽपि सुकुमारतरे शान्ते भक्तिभावे च ते यमकादिनिबन्धनं कथमिव बुद्धिमत्त्वं मन्येरन्? यदि ज्ञान विज्ञान प्रतिपादन परेषु शान्तभक्त्यादि सुकुमाररसभाव संभृतेषु औपनिषद गद्यपद्येषु यमकानुप्रासप्राचुर्यं निम्नकोटिक काव्यत्व प्रयोजकं (२)

- - - - - - - - - - - - - - - - - - - - - - - - - - - - - - -

(१) " शृङ्गारे विप्रलम्भे तच्छान्ते चाऽतिशयान्वितम् ।" का-काव्य प्रकाशे ।

(२) " शब्दचित्र मर्थचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।। काव्यप्र-१३०।यत्राऽर्थ चमत्कृत्युपस्कृता शब्द चमत्कृतिः प्रधानं तदधमं चतुर्थम्।।प्र० आ०रसग- ङ्गाधरे ।

न प्राप्येत, तर्हि तदुचितमेव, उक्तं हि यत:-

" रस भावादितात्पर्यमाश्रित्य विनिवेशनम् ।
अलंकृतीनां सर्वासामलंकारत्वसाधनम् ।।६।२ ध्वन्यालोके,

तेन शान्तभक्त्यादि सुकुमारतर रसभावमयेषु प्राचीनेष्वौपनिषद गद्यपद्येषु यदि यमकानुप्रासादय: प्राचुर्येण प्रयुक्ता न दृश्यन्ते, तर्हि तद्युक्तमेव, तत्र तत्प्रयोगे तेषामलंकारत्वमेव न भवेत् , प्रत्युत दोषाधायकत्वमापद्येत ।

अलं विस्तरेण , उपनिषत्सु ब्राह्मणग्रन्थेषु संहितासु चाऽपि काव्यतया वक्तुं शक्यानि गद्यपद्यानि प्राप्तुं शक्यन्ते । वैदिक साहित्यानन्तरं जातक मालात: प्राक्प्रादुर्भूतेषु रामायण महाभारत भागवतादिषु चरकादिषु चाऽपि काव्यत्व दृष्ट्या रमणीयानि गद्यपद्यानि प्राप्येरन् प्राचुर्येण। तेन विक्रमस्य द्वितीयशताब्द्या: प्रागपि मिश्र काव्यानामुपलब्धिर्भवत्येवेति मन्तव्यम्। अस्तु।

विकासो ह्रासश्च

वैदिक काले सारस्वतक्षेत्रे स्वयंभुवोप्तं गद्यपद्यमयकाव्यबीजं रामायण - महाभारत भागवतादिपुराणेषु चरकादिग्रन्थेषु जातकेषु प्रशस्तिषु च प्ररूढ पल्लवितत्वं चाऽऽसाद्य सर्वत: प्राक् दशम शताब्द्यां ६१५ वत्सरे नल चम्पूरूपेण गद्यपद्यात्मक प्रबन्ध काव्यमुद्भूत्। ततस्तस्यामेव शताब्द्यां ६५६ वत्सरे यशस्तिलक चम्पूरूपं परं गद्य पद्यात्मक प्रबन्ध काव्य माविर्भूत्। एवं चम्पूकाव्यानामुद्भव- समय: समभिमन्यत दशमशताब्दी ।

तत एकादेश शताब्दीत: पञ्चदशशताब्दी पर्यन्तं यद्यपि परिमितान्येव चम्पूकाव्यान्याविरभूवन्, किन्तु कालेऽमुष्मिन् रामायण महाभारत भागवत - शिवनारद मार्कण्डेय पुराणानि जैन पुराणानि इतिहासान् चरितानि देवता- स्थानोत्सव विशेषांश्चाऽऽश्रित्यप्रायेण सर्वास्वपि दिक्षु प्राचलल्लेखनी चम्पू- लेखकानाम् ।

ततः षोडश शताब्दीनो ष्टादशशताब्दी पूर्वार्धं पर्यन्तं प्रचलति चम्पूकाव्यानां रचना प्रवाहे शत द्वयीमितानि चम्पू काव्यानिव्यरच्यन्त विद्वद्भिः । येषु दाक्षिणात्यविदुषामुत्साहः प्रयासाश्च प्रशंसातिश यमर्हन्ति । सो यमगण्यतः चम्पूकाव्यानां विकासकालः ।

तत एकोनविंशायां विंशायां च शताब्द्यामपि भवतिस्म क्वचित् कदाचित् चम्पूर-चनायामुत्साहः प्रसायश्च (१) । श्रीबदरीनाथ झाविरचिता "गुणेश्वरचम्पूः" मन्ये शताब्द्या अस्या अन्तिमा रचना । सो यं ह्रासकालश्चम्पूकाव्यानाम् ।

## उपलब्धिः :

दशमशताब्दीतो विंशशताब्दीपर्यन्तं प्रचलति चम्पूकाव्यानां रचनाप्रयासे अद्ययावत् २४५ चम्पूकाव्यानि निरमीयन्त निर्माणनिपुणैःचणैर्विचक्षणैः यानि वर्ण्यवस्तूनि मूलस्रोतांसि वाऽऽश्रित्य निम्नानुसारं विभाजितानि सन्ति। यथा ++ (२) -
रामायणे ३६,महाभारते २७, भागवते ४५, शिवपुराणे १८,जैनपुराणेषु ६, आचार्याणामैतिहासिक पुरुषाणां राज्ञां चरितेषु ४८,यात्रावृत्तेषु १०, स्थानविशेषेषु देवताविशेषेषु मन्दिराणामुत्सवेषु च २५,स्कन्द नारद-मार्कण्डेयादि पुराणेषु दार्शनिकविषयेषु च ४० सन्ति ।

तेषु महाभारतमुपजीव्यलिखितेषु २७ चम्पूकाव्येषु सकलानामपि महाभारतीयकथानां संक्षेपेण वर्णनपराणि चम्पूकाव्यानि पञ्चैव सन्ति(३)येषु-

---

(१) "चम्पूकाव्यका आलोचनात्मक एवं ऐतिहासिक अध्ययन" ग्रन्थस्य १००, २७२,२७६ पृष्ठेषु द्रष्टव्यम् ।
(२) "च०का०आ०ऐ०अ०" संकेतवत उपर्युक्त ग्रन्थस्य २५१,२७६,२७७पृष्ठेषु द्रष्टव्यम् ।
(३) "च०का०आ०ऐ०अ०" उपर्युक्त ग्रन्थस्य २६२ पृष्ठेव्यम् ।

१- " अभिनव-भारत-चम्पू: " एकादशशताब्धाम् अभिनव-कालिदास विरचिता अप्राप्या ।

२- " भारतचम्पू: " अनन्तभट्टरचिता, याऽत्र समीक्ष्यते ।

३ - " भारत-चम्पूतिलकम् " लक्ष्मण सूरिरचितम्षोडशशताब्द्याम्। इदम् कवे: प्रारम्भिकी रचना मन्यते । " रामायणचम्पू" काव्यस्य भोजरचितस्य युद्धकाण्डं तेनैवरचितमस्ति । यस्य केषां चिदंशानामालोचना अनन्तरचित " भारतचम्पू" काव्यांशै: सह तुलनायां समीक्षायामस्यामेवाऽग्रे विधास्यते। तयोस्तार म्यं तत्रैव विविदितं भवेत् । तद्विरचित " रामायणीय" युद्धकाण्डसदृशं निर्माणनैपुण्यमपि तत्र न मन्यते मनीषिभि: ।तद-प्रकाशितम् । (१)

४ - " भारत-चरितचम्पू: " भागवतकृष्णशर्मरचिता, मद्रपुरप्रकाशिता। या काव्यत्वदृष्ट्यानाऽधिक महत्त्वपूर्णा मन्यते । (२)

५ - " अभिनव-भारत-चम्पू: " श्रीकण्ठचन्द्रशेखराभ्यां रचिता,अप्रकाशिता। या नाऽधिक महत्त्वपूर्णा मन्यते काव्यत्व दृष्ट्या। (३)

अवशिष्टानिचम्पूकाव्यानिमहाभारतीय कथासु कांश्चिदंशविशेषान् आख्यान्-विशेषान् वा लक्ष्यीकृत्य लिखितानि सन्ति । अस्तु ।

## भारतचम्पूकाव्यम्

अनन्तभट्ट: स्वतुल्यदेशकालप्रभवस्य अभिनवकालिदासस्य प्रतिस्पर्धयां तत्कृत् महाभारतीय प्रमुखकथाभागान् लक्ष्यीकृत्य " भारतचम्पू" नामकं काव्यंनिरमात्।

---

(१) " च०का०आ०ऐ०अ० " संकेतितग्रन्थस्य (२१५) पृष्ठे।

(२।३) " च०का०आ०ऐ०अ० " संकेतवतीग्रन्थस्य २४६ पृष्ठे ।

~~किन्तु अनन्तभट्टस्य संमुखे रूपैः चातुर्यस्य च प्रश्न एव नासीत्~~ । चम्पूभारतस्यावलोकनेन नैतदैकान्तिकतया कथयितुं शक्यते, यत् कविरयं पद्यरचनायां पटुरासीत् अथवा गद्यनिगुम्फने निपुणः । यतो हि तस्य पद्यमय्याः सरस्वत्याः चमत्कारसारसुधास्त्रोतांसि यदि प्रवहन्ति परितोमुखान्यजस्रधारया , तर्हि तदीयकवाण्या गद्यखण्डान्यपि श्रीखण्डपिण्डानीव आवर्जयन्ति सुमनोजनमनांसि नितराम् । तेन तु गर्वोद्रिक्तस्य स्वप्रतिस्पर्धिनोऽभिनव कालिदासस्य संमुखे एतदेव दर्शनीयमासीद्, यत् चम्पूकाव्यं तदपि महाभारतेतिहासवर्णनपरं कीदृग् भवेत् तद् द्रष्टव्यम् । अन्यथा अभिनवकालिदासवत् तस्यापिचम्पूकाव्यनिर्माणस्य तत्रापि च महाभारतैकीनिराख्यानकानामेव वर्णनस्य आवश्यकतैवनासीत् । अस्तु अनन्तभट्टः अभिनवकालिदासप्रतिस्पर्धया स्वलक्ष्यानुसारं चम्पूकाव्यमेव तदपि च महाभारतीयकथावर्णनपरमेवविदध्यादिति तस्य आवश्यकं स्वाभाविकं चासीत् ।

आकारः
------

चम्पूभारते द्वादश स्तबकाः सन्ति । तेषु पद्यानि १०४१ संख्यकानि गद्यानि च २२३ संख्यकानि सन्ति । गद्यानि लघुलघूनि दीर्घदीर्घाण्यपि च सन्ति , यानि ३६० पद्यकारपरिमितानि मन्तुं शक्यन्ते । एवं मिलित्वा ग्रन्थस्य आकारः १४०१ पद्यमितं गणयितुं शक्यते ।

तत्र पद्यानि वर्णनीयानुसारिभिः प्रायेण सर्वैरपिप्रचलितच्छन्दोभिर्निबद्धानि सन्ति ग्रन्थेस्मिन् । गद्यानि च (१) साहित्यदर्पणोक्तप्रकारकाणि - १-समासरहितानि वृत्तगन्धोज्झितानि मुक्तकानि, २ वृत्तभागसहितानि वृत्तगन्धीनि, ३ दीर्घसमासघटितानि उत्कलिकाप्रायाणि, ४ अल्पसमासकानि चूर्णकानि च चतुर्वि-

------------------------------------------------------------

१   गद्यभेदवर्णनं साहित्यदर्पणस्य षष्ठपरिच्छेदे यथा -

"वृत्तगन्धोज्झितंगद्यं मुक्तकं वृत्तगन्धि च । भवेदुत्कलिकाप्रायंचूर्णकं चचतुर्विधम् ।

" आद्यं समासरहितं वृत्तभागयुतं परम् । अन्यद् दीर्घसमासाढ्यंतुर्यंचाल्पसमासकम् ।।

का. ३३०।३३२।

धान्यप्यत्र प्राप्यन्ते । तत्र दीर्घसमासकानि अल्पसमासकानि समासरहितानि च गद्यानि तु विद्वद्भिरनायासं प्राप्तुं शक्यानि, अतो मुधा विस्तराय नेह तदुदाहरणोपन्यासो विधीयते । किन्तु वृत्तगन्धीनि गद्यानि तु विद्वद्भिरपि न निरायासं प्राप्तुं शक्यानि , अतो गद्यखण्डद्वयादेव कतिचित् वृत्तगन्धीनि गद्यखण्डानि आदायात्रोपन्यस्यन्ते । यथा -

१ 'मटवीतटवीथिका' ।१।१५। अत्र अनुष्टुप्छन्दसो द्वितीयचतुर्थचरणयोश्छाया ,

२ 'निरासनपरंशरासनवरं' ।१।१५। अत्र उभयत्रापि शार्दूलविक्रीडितच्छन्दस: सप्तमवर्णादारभ्य द्वादशवर्णान्तभागस्यच्छाया ,

३ 'विविधमृगवधं विधातु ।१।१५। अत्र पुष्पिताग्राच्छन्दस: प्रथमद्वितीयचरणयो राधदशवर्णानां छाया ,

४ 'विधातुमुपचक्रमे' ।१।१५। अत्र पृथिवीच्छन्दस आधाक्षराष्टकच्छाया ,

५ ''किंदमनामधेय:' ।१।२७ । अत्र इन्द्रवज्राच्छन्दसोऽन्तिमवर्णसप्तकच्छाया ,

६- 'तत: कृपामन्दमना:' ।१।२७। अत्र उपेन्द्रवज्राच्छन्दस आद्यवर्णाष्टकच्छाया,

७ 'तस्मिन् महीभृति' ।१।२७। अत्र वसन्ततिलकाच्छन्दस आधाक्षराष्टकच्छाया दृश्यते । एवं प्रायेण सर्वेष्वपि गद्येषु वृत्तगन्धीनि खण्डानि प्राप्तुं शक्यन्ते।

आधार:

------

अनन्तभट्टस्य चम्पूकाव्यद्वारा महाभारतकथानामेव वर्णनस्य लक्ष्यत्वात् , महाभारतमेव भारतचम्पूकाव्यस्य वर्णनीयविषयाणामाधारत्वेन स्वीकर्तव्य: । भारतचम्पूकथासारसंकलनं स्तबकानुसारं विधाय पश्चादुपस्थपयिष्यते ।

भारतचम्पूकाव्य वर्णनशैली

------------------

अनन्तभट्टेनचम्पूभारते स्वीकृता वर्णनशैली विस्तृतस्यापि महाभारतीयकथाविस्तरस्य संक्षेपेण रमणीयतया च वर्णनरूप स्वलक्ष्यमनुसरन्ती अतीवमनोहारिण्यस्ति । भाषायां प्रवाहेण सहैव सौन्दर्येण च तस्य प्रगाढोधिकार: पर्याप्तंपाटवं च स्वीकर्तव्यं भवति ।

विषयाणांवर्णने कविना या संक्षेपिणी शैली स्वीकृतास्ति सा विस्तृतरस्य महाभारतीयकथाविसरस्य चतुर्दशशतीपद्यकमितग्रन्थे पूरणप्रयासस्य सुतरामनुकूलैव । वर्णनसंक्षेपाय प्रवृत्तोनन्तकविः चम्पूभारते स्वशैल्यनुसारं समासाख्य प्रौढिगुणं प्रयुयुजे । वर्णनसंक्षेपप्रवृत्त एव चासौ अलंकारानपि सहोक्ति-दीपक तुल्ययोगिता उपमादींश्च बहुत्र संक्षेपायैव प्रयुक्तवान् । समासस्य प्रौढिर्यथा-(१)

विनिर्गतोऽसौ विशिखानिव स्वकान् विमुक्तजीवान्विरचय्य तस्करान् ।
नितान्तवेगामिव गोपरम्परां निवर्तयामास शुचं द्विजन्मनः ।।३।२०।।

अत्र विजयो बाणान्विमुच्य तस्करान् हत्वा गोवृन्दमानीय द्विजस्य शुचं दूरीकुरुते स्म , इति बहुवाक्यबोध्योर्थः क्त्वाप्रत्ययेन उपमाद्वयेन च एकवाक्यार्थतया संक्षेपं प्रापित इति समासाख्या प्रौढिरत्र । एवं संक्षेपेण वर्णयन्नपि विषयं कविरनन्तभट्टो रामणीयकं न क्वचिदप्युपेक्षितवानस्ति । यथा अत्रैव प्रौढ्युदाहरणे वीररसेन तदुपस्कारकेण उपमालंकारेण च कविः किमपि रामणीयकं समावेशितवानस्ति ।

सहोक्तिर्यथा - (२)

एकां समां तत्र वसन् कदाचित् एकां स मां पार्श्वगतां विलोक्य ।
समाधिवृत्त्या सह मौन मुद्रां समापयामास तपोधनेन्द्रः ।।१।४२ ।।

अत्रापि कविना सहोक्त्या संक्षेपेण सह रामणीयकमप्याविर्भावितम् ।

तुल्ययोगिता यथा - (३)

तत्र तेन जगृहे तरस्विना चक्षुषा नृपतिरर्जुनासबः ।
पाणिना च सशरंशरासनं पूर्तये सपदि विप्रवासयोः ।३।१३।।

अत्रापि कविना तुल्ययोगितया रामणीयकं सन्निवेशयता संक्षिप्यैव वर्णनं कृतमस्ति ।

---

१ "बहुवाक्यार्थस्यैकवाक्येनाभिधानम्" इति समासव्याख्या रसगङ्गाधरे प्र. आ. ।
२ "सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्" इतिकाव्यप्रकाशे दशमोल्लासे ।
३ "प्रकृतानामेवाप्रकृतानामेवं वा गुणक्रियादि रूपैकधर्मान्वयस्तुल्ययोगिता" इति रसगङ्गाधरे द्वितीयानने ।

दीपकं यथा - (१)

"कुलशैलशृङ्ग इव जृम्भमे तदा कुरुकुञ्जरे चलति कम्पनं मुहु: "।६।१०।।

वसुधैव तस्य न पुंस्य कैवलं वहति स्म कीचकमुजाप्यदक्षिणा।६।१०।।

अत्रापि कविना दीपकेन रामणीयकं सन्निवेशयता संक्षिप्यैवकृतमस्ति वर्णनम् । अन्यथा वहनार्थक क्रियाद्वयोपादानेन वाक्यद्वयसंपत्त्या विस्तरापत्ते: ।

"उपमा यथा - (२)

"तदनुतिमिरकदम्बेनेवहिडिम्बेन निर्मुक्ताचस्मादहर्मुखादिव वनात्संध्ययैव सरागया तया कमलपालिकया सह तपनभानव इव राजसूनवस्ते निष्क्रम्यशालिहोत्रमुने: "------- ------ ।२।३५ ।। गद्ये ।

अत्र संक्षेपायैव कविना राजसूनुवृत्तवर्णनेन सह प्रभातसमयोऽपि उपमानविषया वर्णित: ।

एवं संक्षेपेण विषयं वर्णयन्नपि कवि: रामणीयक संनिवेशनं न क्वचिदपि विस्मरतिस्म । रामणीयकस्य सन्निवेशायैव शृङ्गारशान्तकरुणवर्णने मृदुमधुरवर्णरचनाभिरसौ माधुर्यगुणमेव प्रयुक्तवान् । वीररौद्रबीभत्सादीनां च वर्णने विकट संयुक्त वर्णघटनाभिरसौ ओजो गुणमेव गृहीतवान् । शृङ्गारादिषु मधुरसुकुमाररसेषु उपनागरिकावृत्त्यनुसारिणो वृत्त्यनुप्रासान् छेकानुप्रासान् यमकालंकारांश्चोरीकृतवान् असौ । वीररौद्रादिषु च दीप्तरसेष्वसौ परुषावृत्त्यनुसारिणा एव तान् निर्गुम्फितवान् ।

कविरसौ रामणीयकाय प्रयस्यन् चमत्कृतिरहितं वर्णनं तु न कुत्रापि विदधौ । अतोऽसौ चमत्कृति विधायिनीषु विधासु यां कां चिदपि विधां स्वकीये प्रत्येकं पद्ये गद्ये वा समावेशयदेव । येन भारतचम्पूकाव्ये रसभावादिध्वनिविरहितानि पद्यानि तु विरलान्येव प्राप्येरन् । यदि तत्र कानिचित् पद्यानि सन्ति रसादिध्वनिविरहितानि तर्हि तत्राऽलंकारचमत्कारस्तु सुप्राप एव भवेत् । कवेरमुष्य साधा-

---

१ दीपकलक्षणं तु " प्रकृतानामेवैकसाधारणधर्मान्वये दीपकम्" इतिरसगंगाधरे-द्वि. ।

२ " सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृति: " इति रसगंगा द्वि. आ. ।

रणस्यापि वस्तुनो वैदग्ध्यपूर्णेन भङ्ग्यन्तरेण निबन्धनरसिकतया चम्पूभारते पर्यायोक्तालंकारः प्राचुर्येण प्रयुक्तः प्राप्यते (१) । यथा-

उपेत्य तां पाण्डुरुदारविक्रमः
प्रजामनः पल्लवयन् प्रशासनात् ।
यशः प्रकाशैर्यमुनासखीसखै-
र्निनाय लोकं निजनामवाच्यताम् ।१।१२।।

अत्र पाण्डोः यशःकरणकं श्वेतीकरणं लोककर्मकं निजनामवाच्यतानयनरूपेण भंग्यन्तरेणोक्तम् । यथा वा -

शैलो गर्भे शिशुरिव भुवः शासनाद्यस्य शेते
वातापिं यो जठरदहने कल्पयामास हव्यम् ।
द्रौणीनिर्यन्करणमहिमा कोपलेशो यदीय -
स्तस्यावासं दिशमभिययौ तापसस्येन्द्रसूनुः ।३।३५ ।।

अत्र महर्षिर्भगवानगस्त्यस्तत्कार्यरूपेण भंग्यंतरेण सूचितः ।

एतेन विवरणेन एतत् सिद्ध्यति, यत् अनन्तभट्टस्य भारतचम्पूकाव्ये उपलभ्यमानाया वर्णनशैल्या द्वावेव आधारौ स्तः , संक्षेपश्चमत्कारश्चेति,संक्षेपं चमत्कारं च वर्जयित्वा पदात् पदमपि न प्रसरत्यमुष्य विषयवर्णनम् ।

---

१ 'विवक्षितार्थस्य भङ्ग्यन्तरेण प्रतिपादनं पर्यायोक्तम्' इति रसगङ्गाधर द्वि. आ. ।

## भारतचम्पू काव्यस्य [redacted]वस्तु

भारतचम्पूकाव्ये द्वादशसु स्तबकेषु कविना प्रामुख्येन पाण्डवानां चरितमेवावर्ण्यत । तत्र -

### प्रथमस्तबके

वर्णितमस्ति , यत् कौरवाणां राजधान्यां हस्तिनापुरे कुरुवंशिनो नृपतेः विचित्रवीर्यस्य पत्न्यामम्बालिकायां पराशरसुतेन अनाथस्य निखिलजगतीतलस्य रक्षणाय समुत्पादितः पाण्डुर्नामा नरेश्वरः प्रजाः पालयति स्म । तस्य सुशासनेन प्रजाः परितुष्टाः आसन् । तदीयसद्गुणानां सर्वत्रापि प्रशंसा भवति स्म । एकदा सः स्वपत्नीभ्यां कुन्ती माद्रीभ्यां सहितो मृगयायै वनं जगाम । तत्र विविध हिंसक पशून् निहत्य रतिसुख निरतात् मृगमिथुनात् मध्ये पुमांसं जघान । शराघात संदारिततनुविगलद्रुधिरधारो मृगः किंदममुनिरूपेणाविर्भूय कुपितः सन् राज्ञे स्त्री संभोगे मृत्यु शापं ददौ । तेन खिन्नो राजा राज्यादिकं परित्यज्य तत्र वन एव स्वपत्नीभ्यां सहन्यवसत् । विरक्तोऽपत्याभावेन च कष्टेन परितप्तः पाण्डुः स्वपत्नीं कुन्तीं स्वदुःखं निवेद्य तनयलाभोपायं संपादयितुं प्रेरयत् । कुन्ती स्वकुले बाल्ये स्वपरिचर्यापरितुष्टस्य मुने दुर्वासि सोऽनुग्रहेण प्राप्तस्य मन्त्रस्य - सामर्थ्येन आहूतैः सुरश्रेष्ठैः कर्कश्च्यव शक्यां सुतलाभसिद्धिं नृपं निवेदयामास । ततः कुन्त्या मन्त्र द्वारा आहूतैः सुरश्रेष्ठैः धर्मराज-मारुत - पुरुहूतैः कुन्त्यां क्रमशो युधिष्ठिर - भीमसेनार्जुनाः माद्र्यां च अश्विनीकुमाराभ्यां क्रमशो नकुल-सहदेवौ एवं पाण्डोः पञ्च पुत्रा अजायन्त । अनयापाण्डोः पुत्र प्राप्त्या दिविभुवि च महानानन्दोल्लासोत्सवोऽजायत । पाण्डु कुमारा वनेस्व शैशवकेलिभिः मुनिजनकुटुम्बान् आनन्दयामासुः । मुनि बालकैश्च सह क्रीडन्तो वने विहरन्तश्च परं ननन्दुः । लालनपालनैः शिक्षासंस्कारादिभिश्च परं बलं प्रावीण्यं चाऽध्यगच्छन्।

युवानश्च बभूवुः ।

एकदा जाते वसन्तविजृम्भणे भाविनः प्रबलतया स्मरपीडितः पाण्डुः कुन्त्या दृग्गोचरो भवन् माद्रीमादायरहसि कुंज्जं प्रविष्टो रतिसुखमनुभूय प्राणान्तमाससाद । माद्रीमृतं पतिमनुजगाम । युधिष्ठिरो दुःखितः पित्रोरौर्ध्वदैहिकुंजं चक्रे । पतिविरहार्ता कुन्ती पितृवियोगदीनान् पाण्डवांश्च धृतराष्ट्रो वनाद् हस्तिनापुरम् प्रत्यानाययत् । काश्यपादय ऋषयश्च दयया धैर्योपदेशं कृत्वा पाण्डवान् समातृकान् तत्कुलक्रमागतं नगरं हस्तिनापुरं प्रापयामासुः । धृतराष्ट्रोऽपि पाण्डुं स्मरन् रुदंश्च आलिङ्ग्य पाण्डुकुमारान् प्रेम्णा निवासयामास, स्वसुतनिर्विशेषं च तत्तत् तेषामिष्टं संपादयन् तोषणं पोषणं च चकार । दुर्योधनश्च बाल्येऽपि भक्तिमत्सु तेषु असकृत् स्वपितुर्वात्सल्यं दृष्ट्वा मात्सर्येण - दुर्मनायमानो राधेयादिदुर्मित्रदुर्बोधि न समेधितं वैरभावं तेषु वर्धयामास । युधिष्ठिरात् वयसि लघुरपि दुर्योधनो धृतराष्ट्रसुतत्वेन स्वस्य राज्याभिषेकं वाञ्छन् अहंकारम् बिभ्राणो अविनयचेष्टाश्चाचरन् भीमसेनेन समये समये ताडितो यौवराज्याभिषेके निराशः सन् पाण्डवेषु विशिष्य च भीमसेने दृढं वैरं बबन्ध ।

द्वितीय स्तबके -

---

ततो वर्णितमस्ति यत् एकदा ते सर्वे कुमारा भागीरथीसलिले विहृत्य समुत्तीर्णाः पटमण्डपेष्वागत्य परिगृहीतमनोहराम्बरहाराभ्यवहाराः सन्तः कुशलकुशीलवकुलकृत संगीतकानुभवेन सुखमासामासुः । तत्र भीमश्च रहसिकस्यचित् तरोरधस्तात् नलिनतल्पे सायंकालिकसुखदसमीरैः सेव्यमानो निद्रौ । तदा निशीथे दुर्योधनप्रेरितैस्तद्भृत्यैस्त्यक्ताः सर्पाभीमम् अदशन्, किन्तु वनदेवतानां शुभाशीर्भिः सनैव प्राणहानिं लेभे ।

अन्येद्युः पुनरप्याजीवन्तं तं भीमं सजग्धिकेलिकायां सूददापितकालगरलविह्वलं रज्जुभिः परिणाह्य दुर्योधनः सुपर्वसरिदन्तर्जले विसर्जयामास । किन्तु तत्र वासुकिना पातालं नीतो दशकलशीपीयूषं च पायितो मदावलायुतबलं च प्राप्तो

विशेषपरिपुष्टगात्रो निर्गत्य विषण्णान् भ्रातॄन् मातरं च प्रसन्नान् दुर्योधनादींश्च विषण्णांश्चकार ।

ततो धृतराष्ट्रो भीष्मं कुमाराणां चापविद्याकौशलं परीक्षाकाष्ठां समारोपयितुं व्यज्ञापयत् । सोऽपि कृपाचार्येण तेषां कार्मुकविद्याकौशलं संपाद्यापि दिशि दिशि प्रख्यातजैत्रगुणं पौत्रगणं महताधननिवहेन सह द्रोणाचार्यस्य पदयोरुपायनीचकार । तत्र द्रोणाचार्यस्य कृपया कुमाराः सत्वरमेव चापविद्यारहस्यज्ञानेपरांकाष्ठां प्रापुः । तत्रैकदा स्नानाय गङ्गायामवतीर्णं ग्राहग्रस्तं च द्रोणम् अर्जुनोग्राहं हत्वा मोचयामास । द्रोणेन गुरुदक्षिणारूपेण जीवन्तं द्रुपदं गृहीत्वा समर्पणाय आज्ञप्ताः कुमारा द्रुपदपुरं निरुध्य चिरमयुध्यन्त । तत्रार्जुनोद्रुपदस्य धनुश्छित्वा तं गृहीत्वा च गुरवे समर्पयामास । तद् द्रोणेनापमानितस्त्यक्तश्चखिन्नो याजमुनिना संपादितेन यज्ञेन द्रोण-हन्तारं पुत्रं धृष्टद्युम्नं पुत्रीं च द्रौपदीं प्राप।

ततो धृतराष्ट्रो वयसा ज्येष्ठं गुणाधिकं च युधिष्ठिरं यौवराज्येऽभ्यषिञ्चत् । युधिष्ठिरस्य सुशासनेन सर्वाः प्रजाः संतुष्टाः नीत्वा च समस्ता निगृहाणि नानाविधैः धनैः परिपूर्णानि अभवन् । तस्य च यशः सागरपारं जगाम ।

किन्तु दुर्योधनेन नानाप्रकारं दुर्बोधितो धृतराष्ट्रः सहजविनयमपि युधिष्ठिरं वारणावतपुरवासाय आज्ञापयामास । तदाज्ञानुसारं युधिष्ठिरो भ्रातृभिर्मात्रा च सह वारणावतंगत्वा तत्र शत्रुसचिवेन दर्शिते लाक्षानिर्मिते गृहे -तस्थौ ।तत्र तद् - गृहस्य लाक्षानिर्मितत्वं ततो निर्गमनाय सुरङ्गाद्वारं च विदुरभृत्येन ज्ञात्वा भीमसेनो रात्रौ पुरोचने तत्सहकारिषु च सुप्तेषु सत्सु लाक्षागृहे अग्निं प्रदीप्य युधिष्ठिरादीन् मातरं च स्कन्धयोरारोप्य सुरङ्गया निर्जगाम । लाक्षा गृहस्य दाहं श्रुत्वा दुर्योधनः पाण्डवान् दग्धान् संभावयन् आनन्दितोऽभवत्।

लाक्षागृहात् निर्गमनानन्तरं मार्गे भीमस्य रूपं मांसलत्वं च दृष्ट्वा हिडिम्बा मदनातुराक्षसी भीमं विवाहाय प्रार्थितवती । तदानीमेव क्रुद्धो हिडिम्बः तत्र तथा भाषमाणां हिडिम्बां नेत्रक्रोधाग्निना दहन्निव अपशब्दान् उद्गिरन् भुजास्फोटं च कुर्वन् बभ्रुकेश्यः प्रादुरासीत् । भीमस्तं राक्षसं मुष्टिभिरेव हत्वा पातयामास ।

ततः प्रातर्हिडिम्बया सह निर्गताः पाण्डवाः मार्गे शालिहोत्रमुनेः सरसि भगवन्तं व्यासं संसेव्य तन्निदेशात् अहानि कतिचित् अतिवाह्यां चक्रुः । तत्रैव च पवनतनय संयोगेन अनुरागातुरानक्तञ्चरी घटोत्कचं पुत्रं प्रासूत ।

ततो वन्याऽशनैर्निर्वाहं कुर्वन्तो विप्रवेषास्ते यमुनातीरस्थिताम् एकचक्रां पुरीं प्रापुः । तत्र रात्रौ मन्दिरं क्रन्दितं कुर्वतीमश्रूणिमुञ्चन्तीं विप्रपत्नीं दृष्ट्वा दयमाना कुन्तीपृष्ट्वा श्रुत्वा च तत्कारणं बकराक्षसाय प्रेष्यमाणेन पक्वान्नशकटेन सह बलिरूपेण तत्पुत्र प्रेषणस्य अनिवार्यतां तत्पुत्रस्थाने स्व द्वितीय-पुत्र-भीमसेन प्रेषणं प्रतिज्ञाय आश्वासितवती । तदनुसारं द्वितीये दिवसे प्रातः शकटान्नेन सह निर्जने बकभवनवने गतो भीमसेनोभयङ्करं राक्षसं मुष्टिभिरेव तूर्णं जघान। बकार्तङ्कमुक्तैः पौरमहाजनैर्भीमसेनो आशीर्भिः सानन्दमभिनन्दितोऽभवत्।

तत्र अपररात्रजागरूकेन केनचित् पथिकेन भाषितां द्रुपदात्मजास्वयंवरस्य वार्तां पाण्डवा शुश्रुवुः , सहैव अनुश्रुतिरूपया तद्वाचा पार्थानां तत्र गमनस्य आवश्यकतां विजयस्य च सिद्धिप्राप्तिं श्रुत्वा ते हर्षिताः सन्तः विप्रवृन्दैः सह द्रुपदपुरं प्रति प्रतस्थिरे । मार्गे सुरसरिति स्त्रीभिः सह क्रीडता चित्ररथगन्धर्वेण कुप्यतापाण्डवान्यरुध्यन्त, पाण्डवैः स पराजीयत ।

द्रुपदपुरं प्रति चलितानां पाण्डवानां पथि धौम्यमुनिना सह समागमोऽजायत । तेन मुनिना सत्कृताः पाण्डवास्तं पौरोहित्ये पथि च पुरस्तात् कृत्वा-पुनः प्रचेलुः । द्रुपदपुरं प्राप्य पाण्डवाः कुलाल गृहे निवासमकुर्वन् । कृष्णरामादयो दुर्योधनादयश्च बहवो राजानः सदलबलं तत्रागच्छन् ।

सर्वं सुसज्जाभिः सुसज्जिते सकलनरपतिभिश्च विराजिते स्वयंवरमण्डपे पाण्डवा अपि उपतस्थुः । शिविकारूढा द्रौपदी सखीभिः सह तत्रागमत् । तत्र दिविचक्रभ्रमन् मत्स्यः स्थापित आसीत् । द्रुपदराजकुमारो धृष्टद्युम्नो व्यज्ञापयत् यत् य उपरि भ्रमन्तं मत्स्यं तदीयाच्छायां दृष्ट्वा बाणेन नीचैः पातयेत् , सः स्वसारं समोद्वहेत् । तथा लक्ष्यपातेने असफलेषु जातेषु अपरराजसु द्विजसङ्घमध्यादुत्थाय विजयो लक्ष्यं भित्वा अपातयदधः । तेन सहर्षा सती द्रौपदी विजयस्यक-

ण्ठेवरणाचम्कमालिकां विससर्ज । बहवो राजानस्तद्विरोधाय उत्तस्थुः, किन्तु विजयस्य बाणवर्षाभिः भीताः पलायाञ्चक्रिरे । विजयोऽपि द्रौपदीमादायकुलालगृहं चागत्य सविसविन्नी चरणौ प्रवन्दत ।

पूर्वजन्मनि द्रौपदी नालायनीनाम्नी पतिलाभार्थं तपस्यन्ती तपःप्रसन्नं भगवन्तं भवं पतिं देहीति पञ्चकृत्वो ब्रुवन्ती परमकारुणिकेन तेन पञ्चपतीन् लभस्वेतिवरं प्राप्तास्ति, अतः पञ्चाऽपि पाण्डवा अस्याः पतयो भविष्यन्ति, इति व्यासेन बोधितो द्रुपदः पञ्चभिरेव पाण्डवैः सह द्रौपद्या विवाहं चकार ।

अन्तरिक्षनिदिष्टभ्रमन्मत्स्यवेधनेन तान् पाण्डवान् निश्चित्य दुर्योधनस्तत्सहयोगिनोऽन्ये च विरोधिनो राजानो स्वस्वसैन्यैर्द्रुपदपुरंन्यरुन्धन् । पांचालराजसैनिकानगरात् निष्क्रम्य युयुधुः, अपससर्पुश्च । तदा पाण्डवाः पुरोबभूवुः, अर्जुनस्य बाणवर्षाभिर्भीताविवशाश्च ते दुर्योधनादयस्वशस्त्रास्त्राणि विसृज्यपलायाम्बभूवुः । तेन तुष्टो द्रुपदः पाण्डवान् भृशमपूजयत् ।

तदा धृतराष्ट्रो द्रुपदपुरे पाण्डवानां प्राकट्यं द्रौपद्या विवाहं द्रुपदकृतं चमत्कारं कौरवाणां च तत्र युद्धे तत्पराजितत्वं श्रुत्वा विदुरद्वारा पाण्डवान् आहूय भगवतः कृष्णस्य समक्षं युधिष्ठिराय अर्धराज्यं दत्वा पुनरपि राज्येऽभ्यषिञ्चत् ।

## तृतीय स्तबके

वर्णितमस्ति यत् धृतराष्ट्रकथनेन युधिष्ठिरः सपरिकरवर्गः कृष्णं पुरस्कृत्य इन्द्रप्रस्थं गतः । कृष्णो ततो द्वारकां गते नारदमुनिस्तत्रागत्य पाण्डवान्प्रतिलैः पञ्चभिरेवोढाया द्रौपद्या उपभोगरूपं निमित्तं गृहीत्वा युष्मासु कदापि कलहो माभूदित्युपदिदेश । तदनुसारं ते एकैकं वर्षं द्रौपद्या सह निवसन्तः तस्थुः ।

एकदा कस्यचित् विप्रस्य चौरैः गोधने हृते युधिष्ठिरनिलयमागत्य तम् दुर्वचोभिः अशपत् । अर्जुनस्तं सविनयमाश्वास्य चौरान् हत्वा गोधनं चानीय विप्राय समार्पयत् ।

विप्रगोधनहर्तृचौरगणानिग्रहाय शस्त्रमादातुं गृहं प्रविष्टोऽर्जुनोयुधिष्ठिरं द्रौपदीसहितं ददर्श । यः कोऽपि स्त्रीसहितं परं पश्येत्, सः वर्षपर्यन्तं तीर्था-

टनं कुर्यादिति नारदनिकटकृतसन्धानुसारं सोऽर्जुनोऽपि विप्रकार्यसाधनानन्तरं सत्वरमेव वर्षावधिकाय तीर्थाटनाय प्रतस्थे । युधिष्ठिरो महता दुःखेन तं विससर्ज ।

तीर्थाटनाय निर्गतोऽर्जुनः सर्वतः प्राक् उदीचीं दिशं जगाम । तत्र मार्गे तीर्थस्नाने सलिलमग्नं तम् उलूपीनाम्नी नागकन्या स्वगृहम् आनीय रमयामास । तेन तस्या इरावान् नाम पुत्रो जातः । तां स तत्रैव त्यक्त्वा हिमाचलं प्रति चचाल । तत्र भगवतः शिवस्य पवित्रं चरित्रं गायतः सिद्धमिथुनात् शृण्वन् पुण्यसलिलासु कटकसरसीषु स्नात्वा प्राचीं दिशं प्रति प्रतस्थे । प्राच्यां महेन्द्रगिरेर्निर्झरजलेषु कृताभिषेकः तत्पादेषु चिरं परिचरन् जलधितटपदव्या दक्षिणां दिशं प्रति प्रतस्थे ।

दक्षिणस्यां चोलदेशे नारिकेलतरुखण्डमण्डितेषु कावेरीतटेषु विहरन् पाण्ड्यराजगुप्तां मणलूरपुरीं प्राप । तत्र तेन चित्राङ्गदानाम्नी राजकुमारी परिणीता । कतिचित् दिनानि च स तया सह तत्र विजहार । तेन तस्या बभ्रुवाहननामा पुत्र उदपद्यत । चित्राङ्गदां तत्रैव त्यक्त्वा सः अग्रे चचाल, तत्र रामेश्वरदर्शनं सेतुदर्शनं च विधाय आत्मानं विगलितपापं पूततमं च मेने ।

ततो सो प्राचेतसीं दिशं प्रतिष्ठमानो गोकर्णतीर्थे गोकर्णेश्वरं दृष्ट्वा पूजयित्वा च प्रभासतीर्थं जगाम । तत्र स्नात्वा सत्सङ्गं कुर्वन् भगवतः कृष्णस्य स्वसुः शौर्यादिसद्गुणांश्च शुश्राव । सुभद्रायामासक्तोऽर्जुनः सततं तां चिन्तयन् तद्विरहेण नितान्तमार्तो भवन्, उपायान्तरं चापश्यन् भगवन्तं कृष्णमेव कामपूरकं सस्मार ।

भगवान् सद्य एव आविर्भूय तं स्मयन् तद्वाञ्छितसिद्धिसरणिमुपदिदेश । अर्जुनस्तन्मतानुसारं भिक्षुवेषः सन् रैवतकगिरिगुहायां तिष्ठति स्म ।

ततः पुरौघोजनेभ्यो रैवतगिरिगह्वरे कश्चिन् महान् तपस्वी तिष्ठति तन्नमस्करणं श्रेयस्करमिति श्रुत्वा कुतूहली हली तेन सह कृष्णश्चागत्य भिक्षुवेषमर्जुनं ससम्मानं नगरं नीत्वा अन्तःपुरे संस्थाप्य तत्परिचर्यायै कृष्णोऽमुं सुभद्रामेव न्ययुङ्क्त ।

ततो व्यतीतेषु कतिचिद्दिवसेषु अर्जुनः सुभद्रां स्वपरिचितां स्वानुरक्तां च वीक्ष्य गृहीत्वा च ततो रात्रौ निर्जगाम , रथेन च स्वनगरं समाजगाम । तज्ज्ञात्वा युद्धोद्यतान् यदून् यदुनाथोन्यवारयत् ।

सुभद्रायामभिमन्युर्द्रौपद्यां च पंचभिरेव पाण्डवबन्धुभिरेकैको मिलित्वा पंचैव पुत्रा अजायन्त ।

ततः कृष्णोऽर्जुनश्च सवनिताजनौ वसन्ते वनविहारं कृतवन्तौ ग्रीष्मे यमुनायां जलकेलीरनुभूय तीरं निर्गत्य वस्त्राणि परिधाय च स्थितौ, ब्राह्मणरूपः क्षुधितो विप्ररूपोऽग्निरुपस्थाय स्वक्षुधाशान्त्यै खाण्डववननाशनाय सर्वैः साहाय्यं विप्ररूपेण निर्मितो ययाचे ।

भगवत्संकेतेन अर्जुनो वह्नि प्रार्थनां स्वीकृत्य तेन उपायनीकृतानि श्वेताश्वयुक्तं रथं कार्मुकमक्षयतूणीरद्वयं च गृहीतवान् ।

ततो वने खाण्डवे वह्नौ प्रज्वलिते सति इन्द्रेण खाण्डवनिवासितक्षकसर्पपक्षपातिना इन्द्रेण वर्षाभिः प्रशमिते च अर्जुनः खाण्डवोपरि शरपञ्जरं वितान । अर्जुने वने वर्षापातोपरोधे जाते सति वह्निः पुनर्दिदीपे । वनेवर्षापातावरोधेन कुपित इन्द्रोऽर्जुनेन युद्धं कृत्वा पराजितश्चपलायाम्बभूव । दह्यमानात्खाण्डवात् अर्जुनो मयनामकं दैत्यं मोचयामास । वह्निं तर्पयित्वा कृष्णार्जुनौ पुरंप्रत्याजग्मतुः ।

## चतुर्थ स्तबके

-------

अर्जुनेन खाण्डवे रक्षितो मयो भगवत आदेशेन युधिष्ठिराय मणिसभां निर्ममौ । भगवति द्वारकापुरीं याते नारदमुनिरागत्य युधिष्ठिरं राजसूययज्ञं कर्तुं प्रेरयामास । राजसूयं निरन्तरायं कर्तुं परामर्शाय युधिष्ठिरेण आहूतः श्रीकृष्णः परामर्शानन्तरं भीमार्जुनाभ्यां सहितो मगधान् गत्वा जरासन्धं युद्धं ययाचे। जरासन्धोऽपि असकृत् पराजितेन कृष्णेन वयसि स्वतो लघीयसा अर्जुनेन च युद्धमस्वीकृत्य भीमेन च तत् स्वीकृत्य गदागदि युद्धं कुर्वाणोऽसौ पंचदशेऽहनि न्यहन्यत ।

ततो भगवति यदुपुरीं गते चत्वारोऽपि क्षितिपानुजाः चतस्रोऽपि दिशो जित्वा महतो हेमपुञ्जान् विविधवसुनिचयांश्च समानीय क्षितिपाय समर्पयामासुः। प्रतीच्याजयेनकुलेन विस्मृतानि वसूनि संचित्य आनीय च भगवान् कृष्णोऽपि तस्मै समर्पयामास ।

ततो भगवदनुज्ञामुखे प्रारब्धे नानाविधैः सुस्वादुभिर्हव्यराशिभिः सविधि संपादिते समापिते च तद्- दीक्षितेन सपत्नीकेन युधिष्ठिरेण भीष्मादिभिश्च प्रेरितः सहदेवः प्रथमपूजया भगवन्तं पूजयामास । तद्विरोधे अपशब्दान् ब्रुवाणः शिशुपालः भीष्मादिभिर्धिक्कृतो भगवता चक्रेणाकण्ठे छित्वाहतः । युधिष्ठिरेणसर्वौर्वीपतिषु तैः समर्पितपूर्वाणि वसूनि द्विगुणानि ग्राहयित्वा विसर्जितेषु भगवान् तमनुज्ञाप्य यदुपुरीं समाजगाम ।

राजसूययज्ञावसरे युधिष्ठिरस्यैश्वर्यं पाण्डवानां समृद्धिं च दृष्ट्वा मणिसभायां स्वस्य जलस्थलभ्रान्त्या स्खलनेन द्रौपदीहासमनुस्मृत्य च नितरां दुःखितो दुर्योधनो युद्धेन पाण्डवान् विविनाशयितुं स्वविचारं मातुलं शकुनिमाह । शकुनिः- पाण्डवानां युद्धे अजेयत्वं जगाद,सहैवद्यूते तेषां सर्वस्वहरणस्य शक्यतामप्यकथयत् ।

ततश्च शकुन्या द्यूतयोजनानुसारं धृतराष्ट्रेण आहूताः पाण्डवाः राजसभां प्राविशन् । तत्र शकुनिना द्यूतप्रस्तावे कृते युधिष्ठिरस्तेन सह क्रीडन् ग्लहेधनानि ग्रामान् राज्यं जायां च सर्वं स्वमप्यपाहारयत् । द्यूतजितां द्रौपदीं सभायामानेतुं दुर्योधनप्रेरितो दुश्शासनस्तां केशेषु गृहीत्वा बलेनाकृष्य च सभायामानयत् । विवस्त्रां च विधातुं वाञ्छितवान् । महाबलिनः पाण्डवाभीष्मादयो वृद्धाः विवेकिनः सदस्याश्च विधेर्विडम्बनां विचारयन्तः सर्वे चित्रलिखिता इव तस्थुः । तदा दीना द्रौपदी क्रन्दमाना अशरणाशरणं दीनदयालुं भगवन्तं द्वारकावासिनमाजुहाव । दुष्टो दुश्शासनो द्रौपद्याः कटिवस्त्रं कर्षन् कर्षन् श्रान्तः सन् स्खलित्वा भूमौ पपात, किन्तु भगवत्कृपया तत् कटिवस्त्रं नान्तं जगाम, अपितु यावत्कृष्टं वर्धमानमेवातिष्ठत् । द्रौपद्यास्तादृशीं विमाननां विलोक्य भीमो दुश्शासनस्य पाञ्चालीकचकर्षिणो दुष्टस्य वक्षोरुधिरं पास्यामि, इत्याघोषयत् । अस्यास्तादृशे परिभवे राधेयोदुर्योधनेन सह कृतहस्ततालं जहासेति तं मदीयो बाणः पञ्चत्वं प्राप-

यिष्यति ॥ इत्यर्जुनोऽघोषितवान् । स्वक्थि माम् उपवेशयितुम् दर्शयितुर्दुर्योधनस्य सक्थ्न्येव मृत्युर्भविता इति द्रौपदी अशपत् । एतेन दुःखदकाण्डेन स्त्रीजनेषु हाहाकारो सदस्येषु च विषादः प्रासरत् । द्यूते अन्तिमग्लहानुसारं पाण्डवा वनवासाय प्राचलन् ।

वनवासे दुःखिता अतिकृशाश्च पाण्डवा भगवन्तं व्यासं दृष्ट्वा रुरुदुः भगवांस्तान् आश्वास्य शिवप्रसादनीं प्रतिस्मृतिनाम्नीं विद्यामर्जुनाय विततार । तया विद्यया शिवं प्रसाद्य पाशुपतास्त्रं तस्मात् प्राप्तुं तपश्चर्यायै हिमाचलं गन्तुं युधिष्ठिरेण आलिङ्ग्य विसृष्टोऽर्जुनो निर्जगाम ।

अर्जुनो हिमालयं प्राप्य शिवं प्रसादयितुं कठोरं तपश्चचार । तेन प्रसन्नो भगवान् भगवत्या पार्वत्या सह किरातदम्पतिरूपेण प्रकटीभूय भक्तेन सह कांचिद् लीलां विधातुं संहितशरचापपाणिः वराहमनुधावन् अर्जुनतपोभूमौ तत्समक्षं प्राप्तो वारितोऽपि तेन तस्मिन् वराहे असौ किरातोऽपि अर्जुन इव बाणं मुमोच । ततो जाते तयोर्युद्धे अर्जुनः शरेषु समाप्तेषु शिवं गाण्डीवेन शिरसिताडितवान् । गाण्डिवे तच्छिरसि विलीने मुष्टिभिरेव तेन युद्धं कुर्वाणोऽर्जुनो भूमौ पातितो मूर्छितः क्रमेण सचेतनश्चभूत्वा शिवया सह वृषारूढं प्रसन्नं साक्षात् शिवं दृष्ट्वा स्वस्वापराधानां क्षमां प्रार्थ्य स्तुत्वा च प्रसन्नात् तस्मात् पाशुपतास्त्रं प्राप । भगवान् कृपया प्रसन्नः तं समाश्वास्य तिरोभवत् ।

## पंचमे स्तबके

---------

शिवात् पाशुपतास्त्रं प्राप्य अर्जुनः इन्द्राज्ञया मातलिना उपस्थापितं रथं समधिरुह्य स्वर्गं प्राप्तः। तत्र इन्द्रः शची च तं जयन्त निर्विशेषं बहु अस्निह्यतां सममानयताम् च। अर्जुनः तत्र पंच वर्षाणि यावत् दिव्यानि सुखानि उपाभुङ्क्त । तस्मिन् एव समये असौ इन्द्रात् अस्त्रविद्यां चित्रसेनगन्धर्वात् च संगीतम् अशिक्षत् । तदानीमेव अर्जुनस्य रूपशौर्यसंगीतादिगुणैः मुग्धा उर्वशी सुरतोत्सुक्येन तदर्थं प्रार्थयमाना तेन प्रत्याख्याता कुपिता च तस्मै षण्ढत्वशापं ददौ । उर्वश्याः शापोऽसौ भाविनि अज्ञातवासे तव गोपनेन लाभाय भविष्यतीति आश्वासितोऽर्जुन इन्द्रेण । तत्र अर्जुनः इन्द्राज्ञया पातालं गत्वा कालकेयनामकान् राक्षा-

सान् अवधीत् ।

धर्मसुतो युधिष्ठिरोऽपि भीमादिभिः सह तावत् बदरिकावनं प्राप । तत्र तरङ्गिण्यां वहमानं कह्लारमुकुलं दृष्ट्वा तदानयनाय द्रौपद्या प्रार्थितो भीमः उत्तरस्यां गच्छन् मार्गे हनुमन्तं दृष्ट्वा तत्परिचयं प्राप्तस्तं स्तुत्वा प्रसन्नस्य तस्य पर्वताकारं रूपं दृष्ट्वा तेन लालितपुरः प्रचचाल । गन्धमादनशैलशिखरे मानससरोवरात् कह्लारमुकुलान्याददानो तत्रत्य राक्षसैरभिद्रुग्धो तान् हत्वा मुकुलान्यादाय द्रौपद्यै समार्पयत् ।

भीमः क्वचिद् गतः प्रत्यागतश्च युधिष्ठिरादीन् स्कन्धमारोप्य नयन्तं जटासुरं दृष्ट्वा मुष्टिघातं जघान ।

ततः प्रत्यागतं शक्तिसंपन्नं च अर्जुनं दृष्ट्वा युधिष्ठिरादयो महान्तं हर्षं प्रापुः , तदीयवार्ताश्रवणेन च अतीव आनन्दिता बभूवुः ।

घोषयात्राव्याजेन स्ववैभवप्रदर्शनायससैन्यं समागतस्य दुर्योधनस्य संगीतगोष्ठीं निजबन्धुमित्रैः सह अनुभवतः सैन्यं संहर्तुं प्रारभत चित्रसेनगन्धर्वः इन्द्राज्ञया आगतः । युद्धे च प्रवृत्ते गन्धर्वैः बद्ध्वा नीयमानोऽसौ क्रन्दमानतद्बन्धुजनप्रार्थ्यमानस्य युधिष्ठिरस्य आज्ञया युद्ध्वा अर्जुनेन गन्धर्वेभ्यो मोचितः पाशबद्धश्च दुर्योधनोयुधिष्ठिर समीपं प्रापितः तेन मृदुलं निर्भर्त्स्य मोचितो न नतमुखस्तूष्णीं मौनैः स्वसैन्यैः सह स्वनगरं प्रत्याययौ । पराभवदुःखितश्च सः प्रायोपवेशनायकृत निश्चयो बन्धुभिर्वारितः शक्रप्रीतये भविष्यति पराभवाभावाय च पौण्डरीकं क्रतुं समाजुहाव ।

एकदा पाण्डवेषु मृगयायै गतेषु पृष्ठतः पाण्डवाश्रममागत्य जयद्रथो द्रौपदीमपहृत्य च पलायितवान् । मृगयानिवृत्तेषु तेषु तद्वार्तां ज्ञातवत्सु च भीमसेनः पलायमानं तं द्रुतमनुधावन् केशेषु गृहीत्वा भूमौ पातयित्वा च भृशं ताडितवान् । युधिष्ठिरसमीपं चानीय तदाज्ञया अर्धमुण्डितशिरस्कं च विधाय तं व्यसृजत्।

एष्वेवदिवसेषु सूर्यः कर्णसमीपं गत्वा तं सस्नेहं कथयामास, यत् कदाचिदपि इन्द्रो यदि त्वत् कवचकुण्डलानि याचेत , तर्हि त्वं तानि तस्मै मादाः, तथापि कर्णः इन्द्रेण याचितानि तानि तस्मै अदादेव ।

द्वैतवनं गतेषु पाण्डवेषु कश्चित् कृष्णसारः कस्यचिद् विप्रस्य यज्ञारणीं गृहीत्वा पलायितः । अरण्यानयनाय पाण्डवामृगमन्वसरन् ।, किन्तु मृगस्तु सुदूरं गत्वा अन्तर्हितः, मृगालाभे मध्याह्ने तृषितेषु पाण्डवेषु जलान्वेषणाय गतेषु भीमादिषु चिरायितेषु तान् अन्वेषयन् युधिष्ठिरो यदैव एकांवापीं प्राप । तदैव तत्र विगतप्राणान् भूशयान् स्वानुजान् अपश्यत् । तान् तथा दृष्ट्वा स्वयमपि मूर्छितो भूत्वा भूमौ पपात । मरणोद्यतो गगनगिरावारितस्तत्प्रश्नानामुत्तराणिसमुचितानि ददौ । तैरुत्तरैः प्रसन्नो यमराज आविर्भूय युधिष्ठिरमाश्वासयामास । तद्भ्रातॄंश्च सर्वाञ्जीवितान् कृत्वा सानुजाय तस्मै वेषान्तरवतां तेषां परिजनापरिचेयत्वस्यवरं यज्ञारणिं च दत्वा अन्तर्दधौ । वरस्य अरणेश्च प्राप्त्या प्रसन्नाः पाण्डवाआश्रमं प्रति निवृत्य अरणिं विप्राय समर्पयामासुः ।

## षष्ठे स्तबके

---

वर्णितमस्ति यत् पाण्डवानां द्वादशवार्षिके वनवासे समाप्ते वर्षपरिमितं गुप्तवासं पूरयितुं ते विराटराजस्य नगर्या बहिः पितृवनस्थे शमीतरौ स्वशस्त्रादीनि निक्षिप्य वेषान्तराणि गृहीत्वा विराटराजमुपतस्थुः । विराटस्तान् भृशं सममानयत् । परमहंसवेषधरं युधिष्ठिरं सदस्यत्वेन सूदवेषधरं दर्वीकरं भीमं महानसाधिपत्वेन षण्ढवेषधरमर्जुनं कन्यकान्तःपुरे नाट्यशिक्षकत्वेन कशापाणिं नकुलं वाजिशालाधिपत्वेन सहदेवं च गोकुलाध्यक्षत्वेन न्ययुङ्क्त । सैरन्ध्री वेषधरा द्रौपदी च विराटराजपत्नीं सुदेष्णामुपस्थिता तया प्रसाधिकात्वेन न्ययुज्यत ।

एकदा द्रौपदी सुदेष्णाया सुरानयनाय कीचकगृहं प्रेषिता । तत्र विवेकहीनः कीचकः तां दृष्ट्वा तत्सौन्दर्यमुग्धो रतिकेलये तां प्रार्थयामास । द्रौपद्याम स्मितः क्रुद्धश्च कीचकः पलायमानां तां बलाद् गृहीत्वा भूमौ पातयित्वा च हस्तपादेन बलवत् ताडयामास । येन मूर्छिता क्रमशः सचेतना च भूत्वा रुदती दीनदीना च जाता सा सुदेष्णानिकटं प्राप्ता कीचकभयेन न केनापि आश्वासितारुदत्येवा-

तिष्ठत् । रात्रौ सा महानसे शयानं भीमं दुःखिता सर्वं वृत्तं न्यवेदयत् । भीमस्तां तद्वधप्रतिज्ञानेन समाश्वास्य शान्त्वयाञ्चकार । भीमसेन परामर्शानुसारं द्रौपदी अन्येद्युः स्वनिकटमागतं कीचकं सूचयामास, यत् आवयोः समागस्थानं संतमसाच्छन्ना नाट्यशाला अद्य भवतु । तदनुसारं रात्रौ जनेषु सुप्तेषुसत्सु निशीथे सुरतौत्सुक्येन-गतः कीचकः पूर्वतो गत्वास्थितेन भीमसेनेन हस्तपादप्रहारैः संताड्य संमर्द्य च पिण्ड-रूपतांप्रापितः । ततो भीमस्तु महानसं गत्वा शयितवान् । भीताया इव द्रौपद्या-आक्रन्दनेन किं किमिति ब्रुवाणाः कीचकानुजा द्रुतमागत्य तादृगवस्थं भ्रातरं विलोक्य रुदन्तस्तत्कारणं च तां विबुध्य तामपि कीचकस्मशानंनयानस्तम्भे बद्ध्वा-स्मशानं नीत्वा च कीचक चितायामक्षिपन् । तदा द्रौपद्या आक्रन्दनं श्रुत्वा द्रुत-मागतो भीमः सर्वानपि कीचकानुजान् पञ्चत्वं प्रापयामास । इतरे च जनाः सर्वे सैरन्ध्री सूचित-पूर्वं तत्पतियक्षभीत्या सर्वं यथावस्थं विसृज्य पलायाम्बभूवुः । भीमो-द्रौपदी च परस्परं प्रशंसन्तौ प्रहृष्टौ च पुनर्नगरं गत्वा यथा-स्थानं शयाते स्म ।

कीचकवधवृत्तश्रवणेन दुर्योधनादयः पाण्डवानां विराटपुरे निवासं संभावयामासुः । विराटराजस्य गोहरणेजाते पाण्डवानां प्राकट्ये जातेभग्नगुप्तवासप्रतिज्ञा भविष्यन्तीति निश्चित्य परामृश्य च त्रिगर्तेश्वरं सुशर्माणं विराटराजगोहरणाय दुर्योधनाद्यः विराटपुरं प्रेषयामासुः । तदनुसारं विराटपुरं गत्वा सुशर्मणा तदीयगोहरणे कृतेससैन्यो विराटराजः समराय निर्जगाम । जातेयुद्धे सुशर्माविराटं बबन्ध । युधिष्ठिर संकेतेन भीमः प्रत्यङ्क्रया सुशर्माणं बद्ध्वा विराटं च बन्धात् म मोचयामास । बद्धः सुशर्मा भीमेन विराटसमीपमानीतो युधिष्ठिरकथनेन विराटाज्ञया मोचितो नतशिरा यथागतं ययौ ।

सप्तमे स्तबके

---

वर्णितमस्ति यत् सुशर्मणो विराटगोहरणे असाफल्यं निभाल्य कौरवाः स्वयं तदर्थं निर्गत्य विराटनगरमेत्य च गोकुलं जहुः । गोपेन उत्तरं प्रति तद्वृत्ते निवेदिते उत्तरेण च अन्तःपुरिकाजनेषु वीरवादे प्रकाशिते सैरन्ध्री प्रेरिता उत्तरा बृह-

न्नलायाः युद्धे सारथ्यस्य स्वीकाराय न्यवेदयत् । उत्तरो बृहन्नला रूपमर्जुनंसारथ्ये नियुज्य युद्धाय प्रस्थितः । कुरु युद्धभूमिं प्राप्य कौरवसेनां दृष्ट्वा क्ष्वेलाहेषितबृंहितानि च श्रुत्वा भीतः सन् रथादवप्लुत्य यावत् पलायनप्रयत्नमकरोत् , तावत् अर्जुनेन बलाद् गृहीतो रुद्धश्च रोदितुमारेभे । अर्जुनेन आश्वासितः प्रोत्साहितश्च उत्तरः सारथ्यं ग्राहितः । युद्धे अर्जुनस्य प्रस्वापनास्त्रेणकौरवेषु सुप्तेषु तेषां वस्त्राणि अर्जुनः उत्तरद्वारा अवातारयत् । प्रस्वापनास्त्रोपसंहारे जाते जागरिता नग्नाः कौरवा ध्वजपटशकलैरेव रचितकौपीना हस्तिनापुरं जग्मुः। अर्जुनः कौरवापहृतवस्त्रनिचयोपरि उत्तरमुपवेश्य स्वयं च पुनः सारथ्यं स्वीकृत्य विजयित्वेन स्वस्थापनाय बोधितमुत्तरं पुरं निनाय ।

विजयविभूषित उत्तरः पुरजनैरभिनन्द्यमानः सभामागतः पितरं ववन्दे। विराटेन भृशं संमानित उत्तरः अर्जुनेन रहस्यभेदनाय वारितोऽपि कंकादिरूपेण तत्र निवसतो युधिष्ठिरादीन् तत्वेन बोधयामास । विराटोऽपि वेषान्तरच्छन्नान् युधिष्ठिरादीन् तत्वेन विज्ञाय भृशं संमानयामास । आहूते भगवति श्रीकृष्णे विराटपुरमागते सति विराटराजः अभिमन्युना सह स्वपुत्र्या उत्तराया विवाहं चकार। विवाहे जाते भगवान् कृष्णः पाण्डवान् अभिनन्द्य च मात्स्यपुरात् द्वारकापुरीं ययौ।

## अष्टमे स्तबके

---:०-०:-----

वर्णितमस्ति यत् युधिष्ठिरः स्वराज्य प्राप्तये युद्धस्य अनिवार्यतां विज्ञाय विराटपुरे स्वपक्षीयान् नृपान् समाहूतवान् । कौरवा पाण्डवाश्च स्वस्वसेनाभिः सन्नद्धा भूत्वा परस्परस्य संमुखीना बभूवुः ।

तस्मिन्नेवाऽवसरे दुर्योधनेन कयाचित् विधया (?) स्वपक्षी कृतः शल्यः स्वभागिनेयेन युधिष्ठिरेण मिलितस्तत्प्रार्थनया कर्णार्जुनयुद्धे वाचाकर्णं हतोत्साहं करिष्यामीति स्वीचक्रे ।

तदानीमेव युद्धे भगवतः कृष्णस्य साहाय्यं कामयमानौ दुर्योधनार्जुनौ द्वारकां पुरीं गत्वा भगवन्मन्दिरं च प्राप्तौ । दुर्योधनो भगवतः सुप्तस्य मस्तकसन्नि-

घौ पार्थश्च तच्चरणसमीपे समुपविविशतुः । दुर्योधनस्य प्रागागत्याऽपि स्वशिरः-समीपोपवेशनेन पार्थस्य च पश्चादागत्याऽपि स्वचरणसमीपोपवेशनेन द्वयोः साम्यं निभाल्य युद्धे सहैतितस्विसैन्यकदम्बक साहाय्यदानेन दुर्योधनस्य केवल स्वसाहचर्य-विधानेन चार्जुनस्य द्वयो भगवान् मनोरथं पूरयामास ।

प्राप्त मनोरथौ तौ स्वस्वसैन्य सन्निवेशौ समाजग्मतुः । भगवानपि स्व-वचनानुसार युधिष्ठिरसमीपं समाजगाम ।

भगवन्तं प्राप्य युधिष्ठिरस्तं प्रार्थयामास, यत् अहंतु युद्धे स्वबन्धुजनानां-वधात् वनवासमेववरं मन्ये, नतु राज्यलाभम्, अतो भवान् कृपया मम बन्धु-भिः समं सन्धये यतस्व, येन मम बन्धूनां मुधाविनाशो माभूत् । सर्वेऽपि तैचिरंजी-वन्तो भद्राणि पश्येयुः ।

भगवान् युधिष्ठिरस्य साधुतायाः प्रशंसां कृत्वा सन्धौ संशयानोऽपित-त्प्रार्थनया हस्तिनापुरं गत्वा विदुरगृहे पितृष्वसुः कुन्त्याः समीपे रात्रिवासं चका-र । प्रातर्विदुरेण दत्तहस्तस्ततः प्रस्थाय भीष्मादिभिः कृतस्वागताचारः कौरववी-राधिष्ठितां सभां प्राविशत् । सर्वैः कृताभ्युत्थानः सत्वर समुपाहृतासनपूजादिकं स्वी-कृत्य धृतराष्ट्रं प्रति युधिष्ठिरस्य सन्धि प्रस्तावं व्यज्ञापयत् । दुर्योधनो रौक्ष्येण सद्य एव तद्विरोधं चकार । धृतराष्ट्रो दुर्योधनस्य उच्छृङ्खलतया दुःखितः स-न् तद्बोधनाय भगवन्तं प्रार्थयामास । ततो भगवान् गुरुजनावहेलनायाः परिणाम-स्य हानिकरतां बोधयन् दुर्योधनं भर्त्सयामास । तेन क्रुद्धो दुर्योधनः सभास्थलान्निर्गत्य कर्णशकुन्यादिभिः समन्त्र्य भगवति बहिरागते सतितं रश्मिभिर्नियमयितुमैच्छत् । त-त् श्रुत्वा कुपितो भगवान् स्वकीयं भीषणं विश्वरूपं प्रकाशयामास । मुनिभिर्भीष्मा-दिभिश्च स्तुतो क्षमा-प्रार्थनायां च कृतायां भगवान् पुनः सौम्यरूपं स्वीकृत्य भीष्म-द्रोणादींश्चाऽऽपृच्छ्य पुनः पाण्डवानां निकटे विराटपुरीमाजगाम ।

तदानीमेव कुन्ती गङ्गातीरे तपस्यतः कर्णस्य समीपं प्राप्यतंपाण्डव पक्षा-श्रयणाय अनुरुरोध । किन्तु कर्णस्तदनुसारोधेनदुर्योधन पक्षत्यागे कृतघ्नतां विश्वा-सघातं च प्रकटी कुर्वन् प्रत्याचख्यौ । दुर्योधनः अङ्गदेशेन सह तच्छरीरमपि रक्षणाय कर्णायितं कृतवान् आसीत् ।

नवमे स्तबके

---

वर्णितमस्ति, यत् कौरवपतिर्दुर्योधन: पाण्डवै: युद्धं चिकीर्षन् स्वसैन्याधिपत्ये भीष्मं न्ययोजयत् । पाण्डवा अपि स्वसेनाधिपत्याय धृष्टद्युम्नमवृण्वन् । कौरवसेनाधिपतिर्भीष्म: स्वसेनायामहारथिजनगणनावसरे कर्णमर्धरथित्वेन गणयामास । तेन कुपित: कर्ण: ' भीष्मस्य सेनाधिपत्ये नाहं शस्त्रग्रहणं करिष्यामीति प्रतिज्ञां चकार ।

सेनयोरुभयोर्मध्ये भगवता अर्जुनस्य रथे स्थापिते उभयपक्षागतान् स्वबन्धुजनान् वीक्ष्य करुणोद्रेकद्रवितहृदयोऽर्जुन: स्वगाण्डिवं तत्याज । भगवान् अर्जुनंयुद्धविमुखतया कर्तव्यपराङ्मुखतामपकीर्तिं च बोधयन् पुनर्गाण्डीवं ग्राहितवान् ।

संग्रामवाद्यनिनदश्रवणेन दिवौकसोऽपि क्षुभितहृदया: सन्तस्तत्र समरदर्शनायाऽऽगच्छन् । तत्र पदातीनां पदातिभिर्वाजिनां वाजिभिर्हस्तिनां च हस्तिभि: सह विविधै: प्रकारै: युद्धानि भवितुमलगन् । भीष्मश्च कल्पान्तकाल इव तदा पुरीभूत्वापाण्डवीयसेनाया: सर्वनाशं कर्तुमारेभे । तेन क्रुद्धो भगवान् तद्वधाय चक्रं जग्राह। अर्जुनश्च शिखण्डिनं पुरस्कृत्य भीष्मोपरि शरासारान्वर्षितुमलगत्। भीष्म:-स्वपुर: शिखण्डिनं दृष्ट्वा युद्धविमुख:सन् शस्त्रं तत्याज । अर्जुनेन प्रतिरोम बाणै: सर्वतो विद्ध:क्षितौ च पतितो भीष्म? शरशय्यायां शयित इव रुधिरकर्दमालिप्तश्च पतद्रक्तधाराभिरिन्द्रगोपकीटवर्षिसान्ध्य घन इवाऽलक्ष्यत ।

दशमे स्तबके

---

वर्णितमस्ति, यत्- भीष्मे शरशय्याशायिनिसति दुर्योधन: स्ववाहिनीनामाधिपत्ये द्रोणं नियुज्य युधिष्ठिरं जीवग्राहं गृहीत्वामह्यमर्पयेति तं प्रार्थयामास।

पाण्डवसेना प्रमाथमाचरन् द्रोणो धृष्टद्युम्नेनाऽरुध्यत । युधिष्ठिरंजिघृक्षन् द्रोण:पाण्डवसेनायां प्राविशत् । अर्जुनस्तं निरुध्य भग्नमनोरथं चकार। ततो द्रोण: सत्यजितमवधीत्।तदाभीमो द्रोणस्य रथाश्वान् नाशयाञ्चकार । न-

कुल: सहदेवश्च तस्य कोदण्डं कृत्तं चाऽभाङ्क्षताम् । तेन क्रुद्धो भगदत्त: सुप्रतीकं नाम स्व-वारणेन्द्रं भीमोपरि प्रेरयामास । भीमस्तं वीक्ष्य तत्कालं पलायामास । सुप्रतीकस्या-क्रमणं विफलीकृत्य भीमो भगदत्तेन सह योद्धुमारेभे ।

तावत् संशप्तकनाशाय प्रवृत्तोऽर्जुनोऽपि तान् विनाश्य पुनरागत्य च द्रोणं भगदत्तं च रुरोध । भगदत्त प्रेरितशक्त्यामर्जुनेन नाशितायां क्रुद्धोऽसावर्जुनवधाय वैष्णवास्त्रं प्रायुङ्क्त । किन्तु अर्जुनरथे पुर: स्थो भगवान् आगतमास्त्रमेवतत् स्ववक्षासि धार-यामास । ततोऽर्जुन: शरान् वर्षन् सुप्रतीकं भगदत्तं च पञ्चत्वं प्रापयामास ।

ततो दिवसावसाने सैन्यै: सह शिविरनिवृत्तं द्रोणं दुर्योधन: प्रार्थयामास यत् - भीष्मकस्तु शरशय्यायां शेते , अधुना मत्कार्यं तवाऽऽयत्तमेव, अतो भवान् मम-मनोरथं पूरयतु । द्रोण: श्व एव पाण्डवान् हनिष्ये , इति तम् आश्वासयामास ।

अन्येद्युर्द्रोण: परवीरविनाशकरं कृत्रायमाणं पद्मव्यूहं विरच्य पाण्डव-सैन्यजनसर्वसंहारं कर्तुमारेभे । अर्जुने दुर्योधन प्रेरितैस्तं युद्धायाह्वयद्भिस्त्रिगर्तैर्योद्धुमन्य-त्र निर्गते दृष्टिगोचरतां चाऽतीतेयुधिष्ठिर: पद्मव्यूह भेदनाय अभिमन्युमादिदेश ।

अभिमन्यु: सत्वरमेव गत्वाऽर्जुनेतरैरभेद्यं पद्मव्यूहं भित्वा प्रविश्य च तद-न्त: कर्णपर्यभावयत् । तदा कर्ण: कृपद्रोणाश्वत्थामजयद्रथादयश्च अभिमन्युना सह युद्ध्वा निरायुधं जातं तं भल्लैर्विद्ध्वा भूमाववपातयन्, भूपतितं च तं जयद्रथ: प्राण-हीनं चकार ।

अन्यतो युद्धं कृत्वा निवृत्तोऽर्जुनो वीरस्य पुत्रस्य जयद्रथकृतं वधं श्रुत्वा भृशं रुरोद । कृष्णो युधिष्ठिरश्च तं धैर्यधारणाय विबोध्य सान्त्वयामासतु: । जयद्रथे क्रुद्धोऽर्जुन: श्व एव द्रोग्धुर्जयद्रथस्य शिरश्छिन्द्याम्, अन्यथा ज्वलनज्वालायां प्रविशेयम् इति प्रतिजज्ञे ।

तच्छ्रुत्वाऽन्येद्युर्द्रोण: पुन: पद्मव्यूहं विरच्य भीतं जयद्रथं तत्पृष्ठे गोपा-याञ्चकार । अर्जुन: पद्मव्यूहं भित्वा चतुरङ्ग सैन्यै: सह तदन्त: प्रविवेश । व्यूह प्र-विष्टार्जुनवृत्त ज्ञानाय युधिष्ठिरेण प्रेषिताभीमादयोऽपि तदन्त: प्रविविशु: । अ-

र्जुनस्तत्र आसायं ससंरम्भंप्राणपणेन युध्यन् शरासारांश्च वर्षन्नपि न कौरव-बलस्याऽन्तं प्राप, न च जयद्रथं लेभे। तदानीमेव सात्यकिं हन्तुं प्रवृत्तस्य भूरिश्रवस: करं बाणेनाऽर्जुनो दूरादेव चिच्छेद। तदानीमेव च भीमो गदयाऽष्टनवतिं धृतराष्ट्रजान् जघान।

जातेऽपि सायंकाले जयद्रथस्याऽप्रकटीभावेन भगवान् कृष्ण: स्वचक्रेण सूर्यमण्डलं तिरोधापयामास। तदा सूर्यास्तमनेन अर्जुनस्य तत्प्रतिज्ञानुसारं ज्वलनज्वालाप्रवेशं निश्चित्य प्रहर्षेण प्रकटीभूतस्य जयद्रथस्य शिर: शरेणार्जुनश्चिच्छेद। छिन्नं शिर: सायं सूर्यायार्घ्यमर्पयतो जयद्रथजनकस्याञ्जलौ पतितं 'किमेतदिति' चकितेन तेन तच्छिरसो भुविपातनात् स्मरहरवरानुसारं सोऽपि शिरसि शीर्ण: प्राप फलत्वम्।

जयद्रथ वध क्रोधेन दुर्योधन: पाण्डवान् विनाशयितुं रात्रावेव युद्धं प्रवर्तयामास। शिविरं प्राप्ताऽपि पाण्डवा: समरभेरीभांकारमाकर्ण्य पुनर्युद्धाय निश्चक्रमु:। तदानीं स्मरणमात्रेणोपस्थितो घटोत्कचोऽपि युधिष्ठिराज्ञया कौरव सैन्य संहारे ससंरम्भं प्रावर्तत। घटोत्कचस्य विकटरूपेण भयंकराक्रमणेन शिलास्तोमवर्षणेन व्यापक विनाशेन च त्रस्ता: कौरववीरा: पलायामासु:। कर्णोऽपि तमुपायान्तराप्रति विधेयं विलोक्य अर्जुनवधाय चिराद् रक्षितया एकवीराऽरातिघातिन्या शक्त्या जघान।

ततो विराटो द्रुपदश्चाऽपि युद्धाय निर्गत्य द्रोणेन युयुधतु:। द्रोणश्चोभावपितौ जघान। तेन क्रुद्धो भीमो महान्तं गजसैन्यं गदयानाशयामास। तस्मिन् कश्चिदश्वत्थामनामको गजोऽपि ननाश। तेन प्रवृत्तम् 'अश्वत्थामा हत:' इति कल कलं युधिष्ठिरानूदितमाकर्ण्य स्वसुतवधं च विज्ञाय सुतशोकेन शस्त्रं त्यक्त्वा योग साधनयामर्तुमुपचक्राम। प्रायोपविष्टस्य तस्य शिर: शस्त्रेण धृष्टद्युम्नश्चकर्त।

पितृवधक्रुद्धोऽश्वत्थामा आग्नेयास्त्रं मुमोच। तत्स्तम्भनाय अर्जुनो ब्रह्मास्त्रं प्रायुङ्क्त।

एकादश स्तबके

---

वर्णितमस्ति, यत् - अन्येद्युर्दुर्योधन: स्वसेनानामाधिपत्ये कर्णं न्ययुङ्क्त।

कर्णेन धृष्टद्युम्नो युयोध । तदानीमेव दुर्योधनः कर्णसारथ्याय शल्यं प्रार्थयामास। शल्यः कर्णसारथ्यं स्वीकृत्य तद्दोषोद्‌घाटनेन अर्जुनयशोवर्चस्ववर्णनेन च तं हत तोत्साहं चकार ।

कौरवपाण्डवसैन्यानां भीषणः संघर्षो बभूव । तदानीं युद्धायाऽऽगतं दुश्शासनं भुविनिपात्य तद्वक्षश्च विदार्य भीमः तद्रुधिरं पपौ । तद्रुधिरालिप्तकरेण च द्रौपदीसमीपं गत्वा तद्वेणीं संजहार । कर्णोऽर्जुनवधाय पन्नगास्त्रं विससर्ज । भगवान् तदस्त्रात् अर्जुनं ररक्ष । विफलास्त्रप्रयोगं कर्णं बाणेनाऽर्जुनोऽबिभेद । कर्णवधेन दुर्योधनो भृशं शोकाकुलो बभूव ।

द्वादश स्तबके

---------

वर्णितमस्ति, यत्- अन्यस्मिन्नहनि दुर्योधनः स्वसेनानायकत्वे शल्यमारोपयामास । युद्धायाऽऽगतं शल्यं युधिष्ठिरः शकुनिं च नकुलो जघ्नतुः । कृपोऽश्वत्थामा च भीतौ युद्धस्थलात् पलायामासतुः । दुर्योधनश्च तादृशं सर्वनाशं विलोक्य निभृतं महाह्रदं गत्वा निममज्ज । स्तम्भनविद्यया च तज्जलं स्तम्भयामास ।

सर्वेषु विनाशितेष्वपि दुर्योधनस्याविनाशितत्वात् तदन्वेषणाय प्रस्थितो भीमः सार्वभौमपदचिन्हान्यनुसरन् तमेव महाह्रदं प्राप, यत्र दुर्योधनः पूर्वतः आगत्य मग्न आसीत् । भीमो दुर्योधनं ह्रदे गुप्तं विज्ञाय कर्णकटुभिर्दुर्वचनैराजुहाव/राह्वयत्। तादृग्वचनानि श्रुत्वा ह्रदान्निर्गतो दुर्योधनो भीमेन सह गदागदि युद्धं प्रारेभे। तदानीं बलदेवोऽपि तीर्थयात्रायां भ्राम्यन् तत्राऽऽगाम । गदायुद्धे भीमो दुर्योधनस्य सक्थि गदया शकलीचकार । प्रतिशोधस्याऽसंपन्नत्वेन प्राणैरत्यज्यमानो दुर्योधनः अश्वत्थाम्नः स्वकृतधृष्टद्युम्नसुप्तद्रौपदीपुत्रपञ्चकवधनिवेदनेन तमालिङ्ग्य प्राणांस्तत्याज ।

अश्वत्थामा च स्वनिग्रहाय निर्गतान् पाण्डवान् श्रुत्वा तेषां सर्वनाशाय स्वरक्षणाय च इषीकास्त्रं प्रायुङ्क्त । अर्जुनो ब्रह्मास्त्रप्रयोगेन तदिषीकास्त्रं संजहार । भीमोऽश्वत्थामानं निगृह्य तच्छीर्षाच्चूडारत्नं चोत्पाट्य द्रौपद्यै समुपाजहार ।

युधिष्ठिरप्रार्थनया कृष्णः पाराशर्यश्च अपत्य निधनशोकेन नितरामार्तौ धृतराष्ट्रं गान्धारीं च सान्त्वयामासतुः । युधिष्ठिरादयस्तत्पादयोः। प्रणिपत्य क्षमां प्रार्थयामासुः ।

तदानीं धृतराष्ट्रस्य 'भीममालिङ्गितुं वाञ्छामि' इति वचनं श्रुत्वा तस्मिन् कपटं तर्कयता भगवता लौहमयी भीममूर्तिस्तत्पुरतः स्थापिता तेनाऽऽलिङ्ग्य चूर्णीकृता।

ततो युधिष्ठिरो युद्धहत बन्धुभ्यो निवापाञ्जलीन् ददौ । ततो युधिष्ठिरो भगवन्तं पुरोधाय बन्धुमित्रैः सह ससैन्यो हस्तिनापुरं प्रविवेश । बन्धुभिर्मित्रैश्च तस्य राज्याभिषेको व्यधीयत । भगवांस्तं सर्वतो भद्रासने समुपवेश्य तन्मूर्धनि राजमुकुटं न्यवधात् ।

युधिष्ठिरो भीष्मस्य ब्रह्मलीनता पर्यन्तं धृतराष्ट्रं पुरस्कृत्य तन्मुखात् वर्णाश्रमाणां धर्मान् शुश्राव । भगवत्सहायतया च अश्वमेध यज्ञं संपादयामास । धर्मेण नयेन च सागरमेखलां महीं प्रशासत् चिरं प्रजाः पालयामास ।

एवं महाभारतस्य प्रमुखां कथां महाकविनाऽनन्तभट्टेन चम्पूभारते द्वादशभिः स्तबकैः रुचिरगिरा वर्णयित्वा ग्रन्थ प्रशस्त्या सह समाप्तिरापादिताऽस्ति स्वग्रन्थस्य।

-0-0-0-0-0-0-

## चम्पूभारते नायक-नायिकादय:

### नायक:

महाकाव्ये नायकनायिकादयो भवन्ति । तेषु नायक: कुलीनो रूपयौवनोत्साहशक्तिसम्पन्नो विद्याप्रवीण: कलानिपुण: श्रीसम्पन्न: अभ्युदयशील: त्यागी दयाक्षमादिगुणाभिराम: पराक्रमी प्रकृतिरञ्जनश्च भवति (१)

चम्पूभारतमहाकाव्ये नायकगुणविशिष्टा बहव: खलु पुरुषश्रेष्ठा अनुभवगोचरतामायान्ति । किन्तु सर्वेषु तेषु नायकत्वमेतदीयमहाकाव्यस्य नैव खलु मन्तुं शक्नुम: ।

सर्वप्रथमं काव्येऽस्मिन् कुरुकुलकैरवशशाङ्कस्य महाराजस्य पाण्डो: खलु-वर्णनं सम्मुखमापतति । यो हि नायकोचित गुणगणमणिकण्ठितोऽपि नाऽत्र मुख्यनायकत्वेनाऽभिमन्तुं शक्यते, तस्य विनाशवर्णनेन तद्गताऽभ्युदयादिवर्णनस्याऽलाभात् । तस्य काव्येऽस्मिन् केवलं युधिष्ठिरादिजनकत्वेन तद्द्वारा तेषां कुलीनत्वद्योतनायैव वर्णनाविषयत्वमस्ति ।

युधिष्ठिरादिषु भीमस्य महाबलशक्तित्वमर्जुनस्य च लोकोत्तरवीरत्वं प्रसिद्धमेव । तदाश्रयत्वेन वीरशृङ्गाराऽद्भुतादिरसानां पूर्णतया परिपुष्टत्वेन वर्णनोपलब्धेस्तयोर्नायकत्वस्याऽपि कोऽप्युत्कर्ष उपलभ्यते । एवं नायकस्य सर्वसुन्दरगुणमणिगणालंकृत: कृष्णोऽपि यत्र तत्र परमोत्कर्षेण वर्ण्यते । चम्पूभारताद् भीमार्जुनचरितानि कृष्णस्य योगदानानि च पृथक् क्रियेरन्, तर्हि चम्पूभारतं नीरसमिव रूपान्तरापन्नमिव जायेत । किन्तु भीमार्जुनौ युधिष्ठिरसम्मुखे सदैव विधेयत्वेन वशंवदत्वेनैवाऽऽत्मानमुपस्थापयत: । युधिष्ठिरो यदि द्यूतक्रीडायां सर्वस्वपहारे

---

१ नायकलक्षणं यथा साहित्यदर्पणे -

'त्यागी कृती कुलीन: सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजो वैदग्ध्यशीलवान्नेता ।३।३०।।

जाते सति महाबलिनमपि भीमं लौकिकवीरमपि चाऽर्जुनं ग्लहे योजयति, तर्हि तद्विषये किंचिदप्यप्रतिवदतोस्तयोस्तत्स्वीकार्यमेव भवति, नच जीवने आपतितास्वपि महामहतीष्वप्यापत्तिपरम्परासु कदाचिदपि युधिष्ठिरस्तयोराक्षेप्यो भवति । दिग्विजयादिष्वर्जितानां सम्पत्तीनामपि तौ सर्वथा युधिष्ठिरायैव समर्पणं कुरुत: , तैस्तै: प्रकारै: प्राप्तानां स्वकीयविविधशक्तीनामपि युधिष्ठिरार्थमेवोपयोगं विधत्त: ।सर्वथा युधिष्ठिरायत्तत्वमेवचाऽऽत्मनस्तौ प्रकटयत: । एवं भगवान् श्रीकृष्णोऽपि नायक सर्वगुणसम्पन्नोऽपि सर्वशक्तिसम्पन्नोऽपि पाण्डवानां कदाचित् परामर्शदातृत्वेन कदाचिद् कार्यसाधकत्वेन कदाचिच्च संरक्षकत्वेन चम्पूभारते दृग्गोचरो भवति । अतो भीमार्जुनयो: कृष्णस्य च युधिष्ठिर सहायकत्वमेव मन्तुं शक्यते ।

चम्पूभारते पुरुषश्रेष्ठानामितरेषां नायकत्व निराकरणात् परिशेषाद् युधिष्ठिरस्यैव नायकत्वं सिद्ध्यति । सहैव युधिष्ठिरस्य नायकत्वे अन्यान्यपि कारणानि सन्ति - पाण्डवेषु ज्येष्ठत्वं सर्वोत्कृष्टत्वं च युधिष्ठिरस्य तज्जन्मसमयेऽपि प्रकटयति कवि: , यथा -

'प्रजाधिपोऽसौ प्रथमं युधिष्ठिरे
सुतेषु तेजस्विषु तेषु पञ्चसु ।
प्रभाकरे पञ्चतया इवोन्नते
प्रपातयामास विलोचन द्वयम् ।।'

अत्र सूर्योपमया युधिष्ठिरस्य पाण्डवेषु कोऽप्युत्कर्ष: सूच्यते कविना ।

वयसेव गुणैरपिज्येष्ठत्वेन युधिष्ठिर एव यौवराज्याय योग्यतमोऽमन्यत धृतराष्ट्रेण/जानताऽपि च तेन दुर्योधनादीन् स्वपुत्रान् यौवराज्याभिलाषिण: पाण्डवद्वेषिणश्च , अभ्यषिच्यत युधिष्ठिर एव यौवराज्ये । युधिष्ठिरस्य स यौवराज्येन प्रजाजना अपि आनन्दं प्रकाश्य तस्य योग्यतमत्वं स्व स्नेहपात्रत्वं च प्रकटयन्ति । यथोक्तं कविना -

'तातोऽपि धर्मतनयं तपनीयपीठ-
मारोप्य चतुरिव लब्धममुं तपोभि: ।
आवर्जितै: कलशवारिभिरभ्यषिञ्च-

दानन्दबाष्पसलिलैरवर्षि च पौराः ॥'

पाण्डवानां लाक्षागृहदग्धत्वख्यात्यनन्तरं द्रौपदीस्वयंवरे पुनः प्राकट्यं वैभव प्राप्तिं च श्रुतवान् धृतराष्ट्रो विदुरेण तानानाय्य तेषु धर्मात्मजायैवार्धराज्यं दत्वा पुनरपि तस्यैव राज्याभिषेकं करोति । यथा -

' वृत्तान्तमेवमवकर्ण्य स राजवृद्धः
    क्षात्रा सकाशमुपनाय्य सहानुजातैः ।
धर्मात्मजाय धुरि कंसभिदोऽर्धभावा-
    दन्वर्थतामथविभज्य ददौ स्वनाम्नः ॥'

धर्मराजस्य पुनाराज्याभिषेकेण च पौराः परमानन्दं प्रकटयन्ति । यथा -

' तस्मिन्नाहितलक्षणे नृपसुते राज्याभिषिक्ते सति
    स्वान्यक्षीणिदधुर्वदम्बु शिशिरं लिप्ताङ्के कुङ्कुमैः ।
रागं यद्बिभरां बभूवुरवहन् यद्रणिते बन्दिभि-
    र्निस्पन्दत्वमतः स्वदृष्टिरितितं पौरा विवव्रुः स्फुटम् ॥'

क्रतुश्रेष्ठे राजसूये युधिष्ठिरस्यैवदीक्षितत्वं तस्यैव च धनैः सर्वमनोरथपूरकत्वं वर्ण्यतेऽत्र महाकाव्ये । यथा -

' प्राग्वंशेऽप्युच्चमैतिष्ठन् प्राग्वंशं पुनराविशत् ।
कुरीरशिरसा पत्न्या कुरुवीरः स दीक्षितः ॥'

' सर्वेषु वर्णेष्वपि दातुरस्मात्
    संप्राप्तवत्स्वर्थमजातशत्रोः
न वर्ण एकस्तु कदापि लेभे
    नार्थं क्रतूनामिह सार्वभौमे ॥'

अतितरां द्रोग्धर्यपि दुर्योधने क्षमया दयया च युधिष्ठिरस्य नायकत्वेकोऽपि महानुत्कर्षः प्रदर्श्यते कविना । गन्धर्वैर्बद्धं भीमसेनेनाऽऽनीतं दुर्योधनं सवात्सल्यं निर्भर्त्स्य मोचयति बन्धात् युधिष्ठिरः, तन्निर्भर्त्सनेन चाऽतिनम्रत्वं वहन्दुर्योधनोऽपि तत्र तस्याऽतिमहत्वं स्वीकरोतीत्यपि वर्ण्यतेऽत्र । यथा -

' वीरव्रातैस्त्रिभुवनतले विश्रुते नः कुलेऽस्मि-

न्नुत्पथत्वं बहुमरिपुर्जैराश्रितोऽप्याधिपत्यम् ।
एवं मंक्षु किमिहभजसे वत्स ! नीचै: प्रणीतं ?
राजन्यानां परपरिभवो राजयक्ष्माह्निकीर्ते: ।।'

'इत्थं निगद्य सरलेन युधिष्ठिरेण
बन्धाद्विमुच्य बकविद्विषता विसृष्ट: ।
मानं च्युतं मृगयमाण इवातिनम्रो
वाचंयमेन स ययौ महता बलेन ।।'

महापुरुषोचित सद्गुण सुशील समलंकृतस्य धर्मराजस्य पराक्रमित्वं न्यायधर्मार्पिते दण्डधारकत्वं चाऽपि प्राप्यते महाकाव्येऽस्मिन् कौरव सेनाधिपतित्वेन-सम्मुखमागतस्य विहिंसित स्वजन कुलस्य मातुलस्याऽपि शल्यस्य वधेन, यथा -

'तत्तादृशं तदनु बाहुबलेन शत्रु-
नाकम्पयन्त ममरावलि मस्तकेन ।
शल्यं निहत्य युधि शल्यमजात शत्रो:
पाणिर्दधौ प्रथमत: परहिंसकत्वम् ।।'

युधिष्ठिरस्य राजनीतिनैपुण्यमपि चम्पूभारते प्राप्यते, यथा-

'आविभ्रतो धरणिर्मुकुन्दनिर्विशेषं
नानाधनायतिभिरस्य नयोदिताभि: ।
पस्त्यं समस्तमपि वासवसंनिभस्य
कोशीबभूव कुतुकै: सह कौरवाणाम् ।२।१५ ।।'

इत्यनेन-

'राज्ञौ मौलिपरस्परां चरणयो: पाणौ प्रदानाश्रियं
बुद्धौ राजनयोदयं हृदिकृपां, सत्यं च जिव्हाञ्चले ।
बाहौ सागरमेखलां वसुमतीं, मस्ते किरिटं मुद्दा
कुर्वन् धर्मतनूमवश्चिरमसौ गोपायति स्म प्रजा: ।१२।३२ ।।'

इत्यनेन च तत् सम्यगवगतं भवति ।

ननु युधिष्ठिरस्य द्यूतप्रवृत्त्यैव सर्वस्वनाश: स्वस्य स्वकीयाऽनुज जननीपत्नीनां च विविधवनवासादिकष्टानि पराभवाश्चाऽभूवन्, अतो युधिष्ठिरे नायकोचितस्य दाक्ष्यस्य वैदग्ध्यस्य चाऽभावो न्यूनत्वं वाऽमन्तव्यम्, भीमार्जुनादिभिरपि अपथप्रवर्तमानो राजानन्यषेधीति, तेष्वपि दाक्ष्यस्य वैदग्ध्यस्य चाऽभावो न्यूनत्वं वा मन्तव्यमिति चेत् मैवम्, द्यूतविनोदो युधिष्ठिरेण रुच्यभावादिच्छलेन निवारयितुं शक्य आसीदेव । किन्तु धीरा वीरा यदि स्वप्राणहानिशंकास्पदं युद्धमिदामपि याच्यमानां न निषेधन्ति , तदर्थमपि यदाते सन्नद्धाभवन्त्येव , तर्हि प्रार्थ्यमानाद् द्यूत विनोदात् पलायनेन स्वभीरुत्व प्रकाशनमपि तेषां कृते न कथमपि शक्यं भवति । यदि स्वभीरुत्व प्रकाशनं ते कथमपि नैव रोचयन्ति ,तर्हि द्यूत विनोदनप्रस्तावस्याऽस्वीकारोऽपि न संगतो भवति तेषां कृते । अत: शकुनिना कृते द्यूत विनोदन प्रस्तावे युधिष्ठिरस्य तत्र प्रवृत्तिर्जाता तदीयधीरवीरत्वानुरूपैवाऽऽसीत् । अस्मादेव कारणात् भीमार्जुनादयो भीष्मद्रोणादयश्च युधिष्ठिरस्य द्यूत प्रवृत्तिं न न्यषेधिषु: । यदा च द्यूत विनोद: प्रारभ्त तदा धनानां नगराणां भूमीनां पत्न्याश्च ग्लहेनियोगो जात एव , सर्वस्वं चैव मपहारितमेव । युधिष्ठिरस्य द्यूत प्रवृत्तेर्वारयितुमशक्यत्वादेव महान्ति कष्टानि भीमार्जुनादिभिर्द्रौपद्या कुन्त्या च सोढानि, किन्तु वनवासस्य गुप्तवासस्य च त्रयोदशवत्सरमितेऽतिदीर्घसमये कदाचिदपि द्यूतप्रवृत्त्या युधिष्ठिरस्तेषामाक्रोश्यो नाऽभवत् , अपितु तादृशस्य भविष्यतोऽवश्यंभावित्वंमत्वा तद्विषये ते मूका एव तिष्ठन्त: आपतितानामापदामुद्धरणाय निराकरणायैव च प्रबलेनोत्साहेन सह प्रायतन्त । ' अवश्यं भाविनो भावा भवन्ति महतामपि' इत्युक्त्यनुसारं युधिष्ठिरस्य द्यूत प्रवृत्ति:, तच्छलेन दुर्योधनस्य तत्सर्वस्वाऽपहार:, त्रयोदशवर्षानन्तरमपि तस्य युधिष्ठिराय पुन: स्वराज्य भागर्ग-समर्पणं, तत: कौरवपाण्डवयुद्धं, तस्मिंश्च कौरवाणांसर्वनाशश्च दैवाभीष्टानि अवश्यं भावीन्यासन् , अतस्तानि जातान्येव । अन्यथा द्यूते युधिष्ठिरस्य सर्वस्वमपहृत्याऽपि यदि दुर्योधनो द्यूतान्ते पुनरपि तस्मै समार्पयिष्यत्,- तर्हि द्यूतविनोदो विनोद एवाऽस्थास्यत्, महती प्रीतिश्च तयोर्मध्ये वर्धिताऽभविष्यत् । किन्तु द्यूतस्य विनोदेति नामकरणं शकुनेश्छलमात्रमेवाऽऽसीत्, अतस्तच्छलेन-

युधिष्ठिरस्य सर्वस्वं दुर्योधनोऽपाहार्षीत्, द्यूतकलहानुसारेण अपहृतस्य त्रयोदशवर्षान्तेऽपि पुन: प्रत्यर्पणं नाऽकार्षीत् । अत: पाण्डवानामपत्तय: न युधिष्ठिरस्य दाक्ष्यवैदग्ध्याभावतन्त्रशून्यत्वान्यतममूलिका:, अपितु दुर्योधनदुर्नीतिमूलिका दैवेच्छामूलिका वेतिमन्तव्यम् ।

महाकाव्येऽस्मिन्नन्ते युधिष्ठिरस्यैव विजयश्रीवृतत्वं स्वानुजविजितसर्वदिगावर्जितसमर्पितसर्वश्रीसमृद्धत्वं श्रीकृष्णसाहाय्येनाऽश्वमेधयज्ञयायजूकत्वं निखिलराजावलिमौलिमालालालितचरणयुगलत्वं सुचिरं प्रजापालकत्वं च प्राप्यते, यथा-

'आलेकायास्तदनु सहजैराहिमाद्रेर्जितश्री?
शौरेर्दोष्णा घटित निजदोर्घर्मभूर्वेदिपार्श्वे ।
साहस्त्रीणां शतमखदुराशामादधानोऽम्यसूया-
मन्यादृक्षं नियमपरधीराजहाराऽश्वमेधम् ।।'

'राज्ञां मौलिपरम्परां चरणयो:, पाणौ प्रदानश्रियं,
बुद्धौ राजनयोदयं, हृदि कृपां, सत्यं च जिह्वाञ्चले ।
बाहौ सागरमेखलां वसुमतीं, मस्तेकिरीटं मुदा,
कुर्वन् धर्मतनूभवश्चिरमसौ गोपायति स्म प्रजा: ।।'

एवं सिध्यति युधिष्ठिरस्यैव मुख्यनायकत्वम्, धीरोदात्तत्वं च ।(१)

## नायिका

------

नायक इव महाकाव्ये नायिकाऽपि काचिदेका कुलीना रूपयौवनसंपन्ना विनयशीलादि सद्गुणगणालंकृता पतिपरायणा च भवति ।(२)

---

१ अविकत्थन: क्षमावानतिगम्भीरो महासत्व: ।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रत: कथित: ।सा०द०।३।३२।

२ अथ नायिका ----- नायक सामान्यगुणैर्भवतियथा सम्भवैर्युक्ता ।
विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया । सा०द०। ३।५६-५७ ।

तदनुसारं चम्पूभारत महाकाव्येऽपि एका द्रौपद्येवाऽस्माकं सम्मुखे नायिकात्वेनाऽनुभवगोचरतामायाति ।

द्रौपद्या: पञ्चालराजदुहितृत्वेन कुलीनत्वं मुनिराजाऽनुग्रहप्राप्तत्वेन रमणीजन शिरोमणित्वं च प्राप्यते महाकाव्ये, यथा -

' --------पार्षत: ----- कृत्यविदां ककुदस्तौजम्भरिपुकुम्भसम्भवावुभावप्युपयमं प्रवर्तयितुं कृतनिवर्तन: सोमकान्तिकोपास्यौ पुत्रौ भागीरथीवनावसथस्ययाजस्य मुनिराजस्य याजनानुग्रहेण परि जग्राह ।' अत्र ' पुत्रौ ' इति पदेन पुत्रीद्रौपदी पुत्रो धृष्टद्युम्नश्चोभावपि मुनिराज याजनानुग्रहप्राप्तौ ख्यातावुक्तौ । द्रौपद्या लोकोत्तर रूपयौवन श्रीसम्पन्नत्वं प्राप्यते स्वयंवर प्रसङ्गे , यथा -

' जाग्रत्सौमककीर्तिसोमनिमिषत्पद्मावकाशात्यय-
प्राप्तेन्दीवरनित्यवासघटितश्यामप्रभा श्रीरिव ।
पाञ्चालस्य सुतातत: परिजनै: सार्धं पुर: पश्यतां
राज्ञां बुद्धिमिवाऽधिरुह्य शिविकां रङ्गस्थलीं प्राविशत् ।'

' द्रौपदी मुखशशिद्युतिसंपत्कौमुदीमहति रङ्गतटाके ।
पद्मचक्रयुगलं नृपतीनां तत्क्षणं विजघटे बहुदूरम् ।।'

नायकेन युधिष्ठिरेण सह राजसूय यज्ञे दीक्षितत्वमपि द्रौपद्या: प्राप्यते महाकाव्ये, यथा -

' प्राग्वंशेऽप्युत्तमे तिष्ठन् प्राग्वंशं पुनराविशत् ।
कुरीरशिरसापत्न्या कुरुवीर: स दीक्षित: ।।'

द्रौपद्या गान्धारीपदाभिवन्दन प्रसङ्गे उत्प्रेक्षाङ्गत्वेन यज्ञान्तावभृथस्नातत्वमप्युपलभ्यते , यथा -

' अवभृथाऽम्बुकणैरिवनूतनैरधिगतामथजालकमौक्तिकै: ।
स्वकबरीं द्रुपदस्य सुताऽपिता सुबलजापदयो: समनीयत ।।'

द्रौपद्या: पतिपरायणत्वमप्युपलभ्यत एव चम्पूभारते । पतिपरायणत्वं नाम नियत पत्यव्यभिचरितत्वम् , तच्च तस्या: पञ्चपतिपत्नीत्वेऽप्यक्षतम्, पञ्चानामपितत्पतीनां महर्षिवेदव्यास सम्मत्या तस्यै नियतत्वात्, यथा कालं नियते-

Smt. HANSA MEHTA LIBRARY
THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA
सत्यं शिवं सुन्दरम्

षु च तस्या अव्यभिचरितत्वात् । तस्या: पतिपरायणत्वेन साध्वीत्वादेव द्यूतसभायामाश्चर्यजनकरूपेण भगवता नीवीवसनाकर्षकाद् दुश्शासनाद् तद्वसनवर्धनेन लज्जा रक्षिता । तत एव विराटराजान्त:पुरे सैरन्ध्री रूपेण स्थितया कीचके प्रलोभनैरप्यत्यक्तशील चारित्र्ययाधीरतया कीचक एव घर्षितो निराकृतश्च। ततोऽपि हठादनिवृत्तोऽसौ भीमसेनेनर्पञ्चत्वं प्रापित: । तत एव च वनवासवैशसेऽपि सा पतिभि: सह सदा प्रसन्नतयैवाऽवर्तत। एतस्याऽऽभासोऽपि गन्धर्वबद्ध दुर्योधनस्य भीमेन युधिष्ठिर समीपानयन समये प्राप्यते , यथा -

" तं वीक्ष्य तत्र तरुमावरणं भजन्ती
सा पार्षती सविध वल्लि परम्परासु ।
हासै: कराङ्गुलिबिलादसकृद् गलद्भि:-
राकालिकीं कुसुमवृष्टिमिव व्यतानीत् ।। "

एवं द्रौपद्या: कुलीनतया रमणीजन शिरोमणितया पतिपरायणतया मुख्यनायकसहचरतया च चम्पूभारते महकाव्ये मुख्य नायिकात्वं सिद्ध्यति ।

## नायक सहायका:

-----------

महाकाव्ये नायकात् किंचिदूनगुणास्तस्य तादृशा एव सहायका अपि भवन्ति । चम्पूभारते च नायकस्य युधिष्ठिरस्य मुख्या: सहायकास्तस्यानुजा भीमार्जुननकुलसहदेवा एव सन्ति । ये यदि बलेन वीरतया सुन्दरतया च नायकं युधिष्ठिरमप्यति वर्तन्ते , तर्हि वयोज्यैष्ठ्यस्य अभावात् सत्यवादिताया दयादामात्यागादिगुण विशिष्टतायाश्च नैयून्यात् तस्मात् किंचित् लाघवमपि प्राप्नुवाना उपलभ्यन्ते । बलेन वीरतया सौन्दर्येण च युधिष्ठिरादधिका: सन्तो पि भीमार्जुननकुलसहदेवा: सर्वथैवाग्रजाय समर्पित सर्वस्वा एव प्रकटयन्त्यात्मानम् । अतो नायकसहायकत्वमेव तेषाम् ।

भगवान् श्रीकृष्णास्तु न केवलं नायकस्य सहायक एव , अपितु नायकस्य-

तदनुजानां तत्पत्न्यास्तन्मातुश्च क्वचित् पथप्रदर्शक:, क्वचित् क्लेशहारक:, क्वचित् लज्जारक्षक: क्वचित् प्राण परित्रायक:, क्वचिदभ्युदयकारक:, क्वचिच्चैश्वर्यवर्धनोऽपि भवन् प्राप्यते । न च नायकात् कथंचिदप्यून गुण:, अपितु निर्दोषपूर्ण गुणविग्रहोऽस्ति, तथाऽपि उपरिदर्शितविषया सर्वविधसाहाय्यकारित्वेन सहायकत्वेनैवाऽसौ चम्पूभारतनायकस्य प्राप्यते ।

क्वचिद् भगवान् व्यास:, क्वचिद् देवर्षिर्नारद:, क्वचिद् वनदेवता: क्वचिद् वासुकि:, क्वचिद् इन्द्र:, क्वचिद् यमश्च येन केनाऽपि रूपेणासाक्षात् परम्परया वा नायकस्य साहाय्यमेवाऽऽचरन्तीति, तेऽपि तत्सहायका एव ।

## प्रतिनायक:

महाकाव्ये नायकप्रतिद्वन्द्वी प्रतिनायकोऽपि भवति, यो हि धीरोद्धतो धनजनाभिजनविद्याबलोन्मद्धः अन्यायपथप्रवृत्तो पापकारी च भवति।(१)। चम्पूभारते तादृक् प्रतिनायकत्वेन दुर्योधनोऽस्मद्दृग्गोचरो भवति ।

दुर्योधन: धृतराष्ट्रसुतेषु ज्येष्ठ: आसीत् । तथापि धृतराष्ट्रो युवराजपदाधिरूढे स्वकनीयसि भ्रातरि पाण्डावुपरते सति दुर्योधनाधिकवयस्कं सद्गुणगणाभिरामं प्रकृतिरंजनं च पाण्डोर्ज्येष्ठं सुतं युधिष्ठिरमेव यौवराज्ये नियोजयितुं न्यायप्राप्तममन्यत न्ययोजयच्च । किन्तु दुर्योधनो न्यायोचितमपि युधिष्ठिरस्य यौवराज्यं नैच्छत्। धृतराष्ट्रेण दत्तेऽपि युधिष्ठिराय यौवराज्ये दुर्योधनोधृतराष्ट्रद्वारा युधिष्ठिरं वारणावतपुरं प्रस्थाप्य अंशेन युधिष्ठिरस्य यौवराज्यमपहृतवानेव । तत्र च तान् लाक्षागृहे प्रदाह्य समस्तमपि यौवराज्यमपहर्तुमैच्छत्, लाक्षागृहदाहादियोजनया दुर्योधनस्य तत्कारकाष्ठपुत्रिकायमाणस्यधृतराष्ट्रस्य च विद्वेषाधीनत्वं निभाल्य युधिष्ठिरादिषु वारणावतात् निर्गतेषु वारणावतशासनमपि दुर्योधन: स्वाधीनमकरोत्। पश्चात् पाञ्चालीविवाहोत्तरं तदपजिहीर्षाकृत पाण्डवरोषेन प्रवृत्तानां दुर्योधनादीनां पाण्डवपराजितत्वं श्रुत्वा धृतराष्ट्रेण विदुरद्वारा पाण्डवानाहूय भगवत: कृष्णस्य समक्षं युधिष्ठिराय द-

---

१ 'धीरोद्धत: पापकारी व्यसनी प्रतिनायक:' सा०द०।३।१३१ ।

तेऽपि पुनरर्धराज्ये द्यूतच्छलप्रपञ्चेन पुनरपि दुर्योधनो युधिष्ठिरस्य राज्यमपहृत्य तं वनवासाय विवशीकृतवान् । तेन दुर्योधनस्याऽन्यायपथप्रवृत्तत्वं स्पष्टी भवति । धनजनाऽभिजन विद्याबलेनान्धत्वेन विविधप्रपञ्चैरनभीष्टानां पाण्डवानां पराजय सम्प्रदानेन तत्सर्वस्वापहरणेन वनवास प्रस्थापनेन च तस्य कूटनीतिनिपुणत्वं धीरत्वं च प्रतीतिपथपथिकौ भवत: । दुर्योधनस्य द्रौपदी वस्त्रापजिहारयिषया, वनवासिनः पाण्डवान् खेदयितुं च ससैन्यसुहृज्जनस्य तस्य वनं गत्वा स्ववैभव दिदर्शयिषया, कुरुकुलकुशलैषिणो भगवत: कृष्णस्य पाण्डवसन्धिप्रस्तावमवमत्य तस्य रज्जुभिर्निजिघृक्षया, विषादान- सर्पदंशनादिना भीमस्य, लाक्षागृहदाहेन च पाण्डवानां जिहिंसया च दुर्योधनस्योद्धतत्वं पापकारित्वं चापि स्फुटीभवति एव ।

एतेन दुर्योधनस्य सर्वथा नायकप्रतिपन्थित्वेन प्रतिनायकत्वं सिद्ध्यति।

प्रतिनायक सहायका:

---

महाकाव्ये प्रतिनायकतुल्यशीलास्तस्य सहायका अपि भवन्ति । ते चाऽत्र चम्पूभारते कर्णशकुनि-दुश्शासनादय: प्रतिनायक दुर्योधनतुल्यशीलास्तत्कार्ये च सहायका एव प्राप्यन्ते ।

तटस्था: केचित्

---

भीष्मद्रोणादय: केचित् महापुरुषा दुर्योधनपक्षेयुद्ध प्रवृत्ता अपि न तत्सहायकत्वेन मन्तुं शक्या: ,युद्धोद्घोषे जाते सति केनाऽप्येकेन पक्षेण वीराणां युद्धप्रवृत्ते रावश्यकत्वात् । न च धार्मिकाणां पाण्डवानां पक्षाश्रयेणैव भीष्मादीनां कथं न जाता युद्धप्रवृत्तिरिति वाच्यम्, धार्मिकाणामपि पाण्डवानां द्यूतपराजये ग्लहमिषेण सर्वस्वं दुर्योधनाय समर्प्य वनं प्रस्थिता-

नां त्रयोदशवर्षपरिमित सुदीर्घकालपर्यन्तं च सम्बन्धं त्यक्तवतां विराटराज - पुरस्थित्वैव युद्धोद्योगं कुर्वतां तेषां पक्षाश्रयेण युद्धप्रवृत्तेराजीवनं दुर्योधनाश्रयेणास्थि - तवतां भीष्मादीनां तत्सम्बन्धं त्यक्त्वातत्स्वीकारस्याऽशक्यत्वात् । पाण्ड - व सहायकत्वेन प्रसिद्धस्याऽपि भगवत: कृष्णस्य दुर्योधनाय युद्ध साहाय्यप्रदा न प्रार्थनां कृतवते स्वसैन्यसाहाय्यदानं कुर्वतोऽपि यदि दुर्योधन सहायकत्वं न स्वीकर्तुं शक्यते, तर्हि दुर्योधनाश्रयेण जीवनं गमितवतां भीष्मादीनां क्षात्रि- याणांकृते युद्धपरिहारस्याऽशक्यत्वात् पाण्डवपक्षेण युद्धस्वीकारस्य चाऽसंभ- वात् परिशेषस्य दुर्योधनस्यपक्षेण युद्धप्रवृत्तिर्यदा अनिवार्याऽभवत्, तदा तेन दुर्योधनपक्षमाश्रित्य स्वीकृतेन युद्धमात्रेण भीष्मादीनां दुर्योधनसहायकत्वं म- न्तुमशक्यमेव । दुर्योधनपक्षमाश्रित्य युद्धप्रवृत्तानामपिभीष्मादीनां दुर्योधनदुर्नी- ति: सम्मता नाऽऽसीत् । दुश्शासनस्य द्रौपदीवस्त्रापहरणोद्यमे -

'दृष्ट्वाभिया सदसि धावनमाचरन्त्या
केश्यचकारसकराङ्गुलिमानताग्र्या: ।
वक्षोरुहेषु च महीप पुरन्ध्रिवर्गा
नासाग्रसीम्नि सुधियश्च नदीसुताद्या: ।४।३७।।

इत्यत्र - दुर्योधनस्य कृष्णाकृतपाण्डवसन्धिप्रस्तावानादरे च -

'धराभुजा किं तटिनीभुवा किं मयाऽधुना किं वसताऽपि दूत्ये ।
पार्थाय दातुं प्रभवेद्धरित्रीं सदैव सा गन्धवहस्य सूनो: ।८।४६ ।।

इत्यत्र भीष्मादीनां दुर्योधनदुर्नीतेरसम्मतत्वं तत्खिन्नत्वं च स्पष्टमेव। यदि भीष्मादिभिर्दुर्योधनादिकपटप्रपञ्चे पतितानां युधिष्ठिरादीनां दुर्दशाया स्तत्तत्स्वकार्यपरिणामरूपाया निवारयितुमशक्यत्वेऽपि तेषामसम्मतत्वे स्थि ते न तेषां प्रतिनायकसहायकत्वं कथयितुं शक्यम्, तर्हि तेषां नाटस्थ्यं स्वीका - र्यमेव ।

## चम्पूभारते रसभावादयः

### प्रधान रसो वीरः

चम्पूभारते सर्वेषां रसानां भावानां चोपलब्धिर्भवति । तेषु वीरो रस एवा ऽत्र प्रधानः यो हि प्रारम्भादन्तावधि परिपूर्णरूपेण युधिष्ठिर एव परिपुष्यति, तत्स्थायिभावस्य उत्साहस्य रसान्तरस्थायिभिः कदाचिदप्यभिभूततया प्रारम्भात् समाप्तिपर्यन्तं स्थिरतयागूढा गूढतया च वर्तमानत्वात् । भीमार्जुनादिष्वपि वीररसः सोऽपि च उत्कटरूपेण उपलभ्यते, किन्तु भीमगतो वीरःकदाचिद् तत्सम्बन्धिना शृङ्गारेणारौद्रेण हास्येन बीभत्सेन अद्भुतेन चापि तिरोभाव्यते, तस्यहिडिम्बारतत्वस्यद्यूतसभादिषु क्रुद्धत्वस्य बक~~कर्क~~रादासी ऽधपायनीसूतशकटान्नमदाणो हास्यालम्बनत्वस्य विविधाश्च जनककार्याकृतिषु अद्भुतालम्बनत्वस्य, दुश्शासनहृद्रुधिरपाने बीभत्सालम्बनत्वस्य च स्पष्टत्वात् । एवं अर्जुनगतेऽपि वीरोऽत्युज्ज्वलः सन्नपि शृङ्गारेणारौद्रेणाऽद्भुतेन च अननुरूपाऽवस्था~~वस्था~~नेन च तिरोभाव्यत एव , तस्यापि उलूपीचित्राङ्गदासुभद्रादिष्वासक्तत्वस्य द्यूतसभायां किरातकथितस्वकृतवराहवधप्रसंगादिषु ~~च~~ च क्रुद्धत्वस्य विविधाश्चर्यजनककार्यकारित्वस्य वीराऽननुरूपबृहन्नलावस्थयाऽवस्थितत्वस्य चाऽपि स्पष्टत्वात् ।

### शृङ्गारः

रसान्तरान्तराण्यपि गौणरूपेण प्राप्यन्तेऽत्र चम्पूभारते । मुख्य नायके शृङ्गारः सकृदेव, सोऽपि चाऽतिगूढतया संक्षिप्ततया च वर्णितः, च चोरहृतविप्रगवानयनाय शस्त्रग्रहणार्थं गेहं प्रविष्टे~~न~~ नार्जुनेन "तत्र तेन जगृहे तरस्विना चक्षुषा नृपतिरर्जुनासखः" (३।१६) इत्युक्तविषया रहसि नायि-

कया सह नायकस्य दर्शनात् , तेन च शृङ्गारभावस्याऽनुमातुं शक्यत्वात् । मुख्ये नायके तादृश एव शृंगार शोभते । भीमे तथा अर्जुने तु शृङ्गारः परिपुष्टरूपेण प्राप्यते, नायकानुवर्तिषु तस्य तथात्वस्यैवौचितत्वात्,अनुवर्तिनां सुखोपभोगलाभेन नायकस्यैव महत्वानुसन्धानात् । प्रतिनायके तु शृङ्गारस्य लेशोऽपि न प्राप्यते , अन्यायपथप्रवृत्तस्य पापकारिणो निरन्तर नायकवैराऽनुध्यायिनस्तस्य सदा सचिन्तत्वेन शृङ्गारापात्रत्वस्यैवौचितत्वात् ।

हास्यम्

-----

भीमस्य बालकेलिषु बकासुरबलिपायसापूपादिभक्षणे च तदालम्बनत्वेन तथा गन्धर्वबद्धदुर्योधनस्य लज्जावनतस्य युधिष्ठिरसमीपानयने च द्रौपदीगतत्वेन (५।६५) अर्जुनहृतायाः सुभद्रायायदुवंशिनां जाड्यस्मरणेन तद्गतत्वेन च (३।७८) हासस्याऽनुभवगोचरताऽपि प्राप्यतेऽत्र ।

करुणः

-----

महाभारतयुद्धे दुर्योधनादीनां सर्वेषामपि तत्पक्षपातिनां समाप्तौ धृतराष्ट्रगतः करुणो रसोऽपि परिपुष्टरूपेण दृग्गोचरो भवति । एवं बकासुरबलये गमिष्यतो निश्चितमरणस्य ब्राह्मणबटोर्मातर्यपि दृश्यते करुणोऽत्र चम्पूभारते ।

रौद्रः

-----

भीमार्जुनादीनां क्रोधोपलब्धे रौद्ररसस्यापि परिपुष्टस्याऽत्र चम्पूभारते भवत्यनुभवगोचरता ।

भयानकः
-----

बकहिडिम्बादि राक्षसालम्बनत्वेनभयस्थायिभावको भयानको रसोऽप्यत्राऽधिगच्छति दृग्गोचरतां चम्पूभारते ।

बीभत्सो रसः
---------

बकासुरावासभूतस्य कंकालशैलनिलयस्य अस्थिचर्मादिावृतस्य गृध्रशृगालादि संकटस्य वनस्य जुगुप्सा विषयस्य वर्णनाद् बीभत्सोऽप्यत्र प्राप्यते - वर्णितश्चम्पूभारते ।

अद्भुतः
-----

अर्जुनस्य खाण्डवेशरपञ्जरनिर्माणेन, द्रौपदी स्वयंवरे चोच्चैश्छायामात्रदृश्यस्य उपरिभ्रमतो लक्ष्यस्य वेधनेन, इन्द्रादिविजयेन, शिवयुद्धेन, भीमादीनामपि तादृक्लोकोत्तर कार्यैः विस्मयापादकैरद्भुतरसस्याप्युपलब्धिर्भवति चम्पूभारते ।

शान्तः
-----

वनवासे पाण्डुगतत्वेन , तपस्यायां कर्णगतत्वेन अर्जुनगतत्वेन च , शान्तोऽपि रसोदृश्यतेऽत्र चम्पूभारते परिपोषं प्राप्तः ।

रत्यादयोभावाः
----------

भगवतिकृष्णे व्यासनारदादि मुनिषु विषयेषु रतिभावस्य ,भी

मार्जुनादिगता गर्वामर्षधृतिमत्याद्यः, दुर्योधनकर्णदुश्शासनादिगता असूयाचापल्यादयः, ब्राह्मण्यादिगतादैन्यविषादादयो भावा अपि वर्ण्यन्तेऽत्र चम्पूभारते।

एवं प्राधान्येन गौणतया च रसान्तराणि भावाश्च सर्वेऽपि वर्णिताः सन्ति ग्रन्थेऽस्मिन्।